$5.00

व्यावहारिकं पाणिनीयम्

संस्कृतकार्यालयः
श्रीअरविन्दाश्रमः, पुदुच्चेरी

ABOUT THIS BOOK

This book introduces Pāṇini in a very practical and easy way. Only 100 *sūtras* of Pāṇini have been selected and through these one can go to the roots of many commonly used words and discover the process of their formation.

In St. James School, South Kensington, London, English children aged eight to nine know about 400 *sūtras* of Pāṇini which they recite by heart.

Here we offer to our young students just 100 *sūtras* of a very practical nature to give them some fundamental knowledge about the work of Pāṇini and his scientific approach.

व्यावहारिकं पाणिनीयम्

डॉ. नरेन्द्रः

संस्कृतकार्यालयः
श्रीअरविन्दाश्रमः, पुदुच्चेरी - ६०५ ००२

प्रथममुद्रणम् १९९९

Available at
SABDA, Pondicherry - 605 002

ISBN 81-7058-539-2

प्रकाशकः संस्कृतकार्यालयः, श्रीअरविन्दाश्रमः, पुदुच्चेरी - २

मुद्रकः श्रीअरविन्दाश्रम-मुद्रणालयः, पुदुच्चेरी - ६०५ ००२

Sanskrit Grammar and Pāṇini

Sanskrit has a scientific base which no other language in the world has including Greek and Latin with whom it has close affinity both in vocabulary and grammar. This is largely due to its grammatical organisation, particularly Pāṇinian tradition as formulated by Pāṇini in his book अष्टाध्यायी . . . (p. 1)*

This book (अष्टाध्यायी) is one of the greatest exhibits of human intellect. It is the first attempt in the history of the human mind to make a sort of "chemical analysis" of a language on scientific lines (शब्दानुशासनम्). His grammar is not only considered a masterpiece of close reasoning and artistic arrangement, but remains till today unsurpassed in its economy of words to describe linguistic features...(p. 2)

Because Sanskrit grammar is so thorough and precise, the form of the language is well-defined, orderly and perfect. In fact, Sanskrit literature follows such beautiful and accurate mathematical patterns that one marvels at them. Even the Greeks cannot claim such regularity.

Sanskrit has also the power of organised growth since it is developed in a most mathematical and logical way....(pp. 4 - 5)*

*Dr. Raja Ramanna, Atomic Scientist, *"Sanskrit and Science"*

आमुखम्

'आकुमारं यशः पाणिनेः' इति प्रसिद्धं वचनम्। पुरा बालकात् आरभ्य वृद्धपर्यन्तं सर्वेऽपि पाणिनि-व्याकरणस्य अध्ययनेन विमुग्धाः तस्य यशोगानं कुर्वन्ति स्म। किन्तु अद्यतनी स्थितिः भिन्ना। अद्यत्वे संस्कृत-शिक्षकेषु बहवः पाणिनि-व्याकरणं न जानन्ति ! का कथा छात्राणाम् ?

आङ्ग्लदेशस्य एकस्मिन् विद्यालये अष्टवर्षीयाः छात्राः पाणिनि-व्याकरणस्य चतुःशतं सूत्राणि जानन्ति, संगणित्र-वैज्ञानिकाः पाणिनेः भूरि भूरि प्रशंसां कुर्वन्ति, पाणिनिपद्धत्या संस्कृतव्याकरणं गणितवत् पठितुं शक्यते इति यदा अहम् अत्र द्वादशवर्षीय-बालकान् कथयामि तदा ते अहमहमिकया पाणिनेः व्याकरणं पठितुम् उत्साहं प्रदर्शयन्ति। तेषां कृते एष मम प्रथमः प्रयासः।

श्रीमाता ११. ११. ६७ दिनाङ्के अकथयत् –

It [Sanskrit] contains the sounds, the root-sounds of many words. This is something I studied with Sri Aurobindo and it is obviously very interesting. Some of these roots can even be found in all the languages of the world – sounds, root-sounds which are found in all those languages. Well, this, this thing, this is what ought to be learnt and this is what the national language should be. Every child born in India should know it, just as every child born in France has to know French...

So I would like to have a simple Sanskrit taught here, as simple as possible, but not "simplified"– simple by going back to its origin... all these sounds, the sounds that are the roots of the words which were formed afterwards...

मूलध्वनि-संवलित-धातुभ्यः शब्दनिर्माण-विषये श्रीमाता यत् कथयति तद्दिशायाम् अपि एष मदीयः प्रथमः प्रयासः।

अस्मिन् प्रयासे पुदुच्चेरीस्थ-प्राच्यविद्या-संस्थानस्य व्याकरण-विभागाध्यक्षाणां श्रीमतां वेङ्कटराज-शर्ममहोदयानां सस्नेहं साहाय्यम् उल्लेखयोग्यम् । एतैः महोदयैः अस्य पुस्तकस्य संशोधनं सावधानं कृतम् । एषाम् उदारं साहाय्यं विना इदं कार्यम् अस्माकं सन्तोष-जनकं न अभविष्यत् । अतः एभ्यः महानुभावेभ्यः गभीरां कृतज्ञतां ज्ञापयामि ।

अस्य पुस्तकस्य शुद्धिवाचने साहाय्यकारिभ्यः सहृदयेभ्योऽपि कृतज्ञतां निवेदयामि ।

– नरेन्द्रः

पारिभाषिक-शब्दानाम् अनुक्रमणिका

Index of Technical Terms

पारिभाषिक-शब्दः	*पृष्ठम्*	*पारिभाषिक-शब्दः*	*पृष्ठम्*
अङ्ग	३१	धात्वर्थ	५, २२
अधिकार	२	निपात	४
अननुनासिक	४	परिभाषा	२
अनुदात्त	१६	प्रगृह्य	५६
अनुनासिक	३	प्रत्याहार	१, ८
अनुवृत्ति	३, १७	प्रातिपदिक	४
अन्यतरस्याम्	६	प्लुत	३
अपवाद	५, ५१	भ	९९
अवसान	१०९	भाव	५, २२
आगम	३२	लोप	२२
आदेश	१७	वर्गीयवर्ण	१२
आर्धधातुक	४०	वार्तिक	५
उदात्त	१५	विधि	२, १९
उपदेश	१०	विप्रतिषेध	६
उपधा	३१	वृद्धि	१६
उपसर्ग	४	संज्ञा	२
एकादेश	५	संहिता	१९
कृदन्त	५	सवर्ण	३
गुण	१७	स्वरित	१६
तद्धित	६	सार्वधातुक	३८
दीर्घ	३	ह्रस्व	३

विषयसूची

पाणिनेः परिचयः ७
अष्टाध्यायी १३
पाणिनीय-सूत्राणि १३
इत्संज्ञा-विधायक-सूत्राणि २०
कृत्प्रत्ययाः
अच् ४०
अनीयर् ३६
अप् ४२
क्त ७६
क्तवतु ७६
क्त्वा ७६
क्तिन् २२
घञ् २४
ण्वुल् ९३
तुमुन् ८३
तव्यत् ८३
तृच् ८३
ल्यप् ३४
ल्युट् ४५
तद्धितप्रत्ययाः
ठञ् १०१
त्व ९६
तल् ९६
ष्यञ् ९८
स्वरसन्धिः
दीर्घसन्धिः ४९
गुणसन्धिः ५०
वृद्धिसन्धिः ५१
यण्सन्धिः ५२
अयादि-चतुष्टयम् ५३
पूर्वरूपम् ५६
प्रकृतिभावः ५६
व्यञ्जनसन्धिः ५७
विसर्गसन्धिः ६७
णत्वविधानम् ७३
परिशिष्टम्
क्तिन् १०३
घञ् १०७
क्त १०७
हल्सन्धिः १०८
धातुरूपम् १०९
उत्तराणि ११०

Preliminary Tips

Please read the following before you proceed :

1. Read the technical terms first. To begin with, it is necessary to know the term प्रत्याहार । You may read the other terms when you come across them in the text.
2. The same terms are explained in simple Sanskrit also when they appear for the first time.
3. Refer to the Index to find the technical terms.
4. अनुवृत्ति (recurrence) and the meaning of the *sūtras* are given in the Pāṇinian way. It is better to understand them. If they are difficult for you, don't worry. They are explained in simple Sanskrit immediately after.
5. *Sūtras* like उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः (पृ. १५-१६) are not so important now.
6. To find the meaning of the *sūtras* given in brackets, see the सूत्रसूची at the end of this book.
7. Repetition in some places is deliberate to make the meaning clear for beginners.
8. The utility of this book depends entirely on understanding it from its very beginning.
9. Once you finish this book, a second reading would give you a better understanding.

Technical Terms

प्रत्याहार – पाणिनि has based his grammatical system on a novel arrangement of *varṇas* (letters). They are as follows.

अइउण् ।१।। ऋऌक् ।२।। एओङ् ।३।। ऐऔच् ।४।।
हयवरट् ।५।। लण् ।६।। ञमङणनम् ।७।। झभञ् ।८।।
घढधष् ।९।। जबगडदश् ।१०।। खफछठथचटतव् ।११।।
कपय् ।१२।। शषसर् ।१३।। हल् ।१४।।

Based on these 14 *sūtras* पाणिनि forms *pratyāhāras* to avoid a detailed recital of *varṇas* in his *sūtras.* Thus the *pratyāhāra* is a grammatical symbol or abbreviation. For example, the *pratyāhāra* अच् denotes all the vowels beginning with अ in the *sūtra* अ इ उ ण् and ending with च् of the *sūtra* ऐ औ च् ।

The *varṇas* like ण् at the end of अ इ उ ण्
क् at the end of ऋ ऌ क्
ङ् at the end of ए ओ ङ्
च् at the end of ऐ औ च्
are indicatory letters. They are called इत् *varṇas* which disappear as soon as the purpose of indication is done.

Like अच् Pāṇini has accepted 43 *pratyāhāras* in his book 'अष्टाध्यायी' viz. अक्, इक्, यण्, खर्, जश्, हल् etc. which are given on pages 8-10.

The peculiarity of *pratyāhāras* is that they can start from any *varṇa*, even coming in the middle of a group but they must end with an इत् *varṇa*. All the इत् *varṇas* coming in a *pratyāhāra* are ignored.

संज्ञा-सूत्र (the defining rules) – They define the terms like इत्, गुण, वृद्धि, सवर्ण, अनुनासिक etc. which are often used. Thus संज्ञा is a technical term, a short wording to convey ample sense, a term to know the general nature of things.

In Pāṇini's grammar 'अष्टाध्यायी' the first two chapters (पाद) of the first book (प्रथम अध्याय) give and explain the technical terms numbering over one hundred.

परिभाषा-सूत्र (the interpreting rules) – They have their application everywhere and are decisive.

परिभाषा is an authoritative statement or dictum, helping (1) the correct interpretation of the rules of grammar, or (2) the removal of conflict between two rules which occur simultaneously in the process of the formation of words.

विधि-सूत्र (the operational rules) – They prescribe general rules.

अधिकार-सूत्र (the governing rules) – They have nothing to do by themselves. They follow or are

taken as understood in every following rule upto a particular limit. As for example, प्रत्ययः (३. १. १) परश्च (३. १. २). Their authority runs from ३. १. ५ to निष्प्रवाणिश्च (५. ४. १६०). Another अधिकार-सूत्र is धातोः (३. १. ९१) whose authority extends upto छन्दस्युभयथा (३. ४. ११७), i.e., it will sit before 540 *sūtras*.

अनुवृत्ति – अनुवृत्ति is a repetition or recurrence of a word from the previous to the subsequent rule or rules, which is necessary for the sake of the intended interpretation. For example, see page 17.

सवर्ण – *Varṇas* which have the same place of utterance and in uttering involve the same amount of effort, are treated as *savarṇas* (homogeneous letters).

ह्रस्व, दीर्घ, प्लुत – A vowel whose timing is just one syllabic instant (मात्रा) is ह्रस्व, of two *mātrās* is दीर्घ, of three *mātrās* is प्लुत. For example, अ is ह्रस्व, आ is दीर्घ, आ३ is प्लुत ।

अनुनासिक – ञ, म, ङ, ण, न are called अनुनासिक *varṇas* (nasal letters). अनुस्वार is also called अनुनासिक which is used in place of म् if it is followed by a consonant. The vowels too have their अनुस्वार variety.

Vowels which are uttered nasalized by पाणिनि in his works viz. सूत्रपाठ, धातुपाठ, गणपाठ etc. are no more heard nasalized in modern times.

अननुनासिक – That which is not अनुनासिक is called अननुनासिक ।

निपात – *Nipātas* are particles which possess no gender and number, and the case termination after which is dropped or elided.

Nipātas are enumerated in the fourth chapter (चतुर्थपाद) of the first book (प्रथम अध्याय) as प्राग्रीश्वरान्निपाताः (१.४.५६). Under this अधिकार-सूत्र *nipāta*s are enumerated as चादयः (च and others), प्रादयः (प्र and others).

उपसर्ग (preposition, prefix) – *Upasargas* are a class of *nipātas* only. The *nipātas* प्र, परा, अप, सम्, अनु, अव, निस्, दुस्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप are known as *upasargas* when they are prefixed to verbs – प्रादयः, उपसर्गाः क्रियायोगे (१. ४. ५८-५९)

प्रातिपदिक – प्रातिपदिक is a nominal stem to which case-endings (विभक्ति-प्रत्ययाः) are added. Pāṇini has given two kinds of bases of a word, i.e., the noun-base and the verb-base. The noun-base is named प्रातिपदिक while the verb-base is named धातु । The definition of प्रातिपदिक is given by him as a noun-base

which is possessed of sense, but which is neither a root (धातु) nor a suffix (प्रत्यय) – अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१. २. ४५). Although his definition includes the कृदन्त words, the तद्धितान्त words and the compound words, still, पाणिनि has mentioned them separately in the rule कृत्तद्धितसमासाश्च (१. २. ४६) to distinguish them as secondary noun-bases as compared with the primary noun-bases which are mentioned in the rule अर्थवद-धातुरप्रत्ययः प्रातिपदिकम्।

धात्वर्थ, भाव – The verbal activity.

अपवाद – An exception of the general rule.

एकादेश – एकादेश is a single substitute in the place of two original units. As for example, ए is a single substitute when it replaces अ and इ.

वार्तिक – वार्तिक is a statement which is as much authoritative as the original statement to which it is given as an addition for purposes of corrections, completions or explanations. Thus *vārtikas* are explanatory rules added to the *sūtras* of Pāṇini.

कृदन्त – the word ending with a कृत् suffix. कृदन्त words are root-nouns or nouns derived from roots, e.g., कृति, हरण। These words are derived from the root कृ and हृ by the application of कृत् suffixes क्तिन् and ल्युट्, i.e., कृ + क्तिन् = कृति, हृ + ल्युट् = हरण।

तद्धित – The term तद्धित is a suffix added to a noun to make another noun, e.g., दशरथ + इञ् = दाशरथि। Here the suffix इञ् is added in the sense of son. Hence दाशरथि means the son of दशरथ।

The number of तद्धित suffixes mentioned by Pāṇini is quite a large one. There are in fact 1110 rules in the तद्धित section covering almost two *Adhyayas* viz. from 4. 1. 76 to the end of fifth *Adhyāya.*

विप्रतिषेध (conflict, opposition) – When two rules of equal strength have conflict or oppose each other then Pāṇini's dictum विप्रतिषेधे परं कार्यम् (1. 4. 2) applies and the rule mentioned later on, or subsequently, in the अष्टाध्यायी is allowed to apply.

अन्यतरस्याम् (optionally) – This term is very common in the rules of Pāṇini, where the terms वा and विभाषा are also used in the same sense.

पाणिनेः परिचयः

महर्षिः पाणिनिः संस्कृतव्याकरणस्य प्रधानाचार्यः । पाणिनेः पूर्वमपि अनेके वैयाकरणाः आसन्। किन्तु तेषां ग्रन्थाः अद्यत्वे अज्ञाताः अलभ्याश्च। लभ्यमान-ग्रन्थेषु महामुनि-पाणिनेः ग्रन्थः प्राचीनतमः। निरुत-?

पाणिनिः पञ्चाप(पञ्चनद)प्रदेशस्य सलातुर-नामके (अधुना लाहोर इति) स्थाने अजायत। यद्यपि तस्य जन्मकालविषये मतभेदः वर्तते तथापि ख्रिस्तपूर्व-सप्तम-शताब्द्याः ख्रिस्तपूर्व-पञ्चम-शताब्द्याः च मध्ये तस्य जन्म इति ऐतिहासिकाः वदन्ति।

पाणिनिः बाल्यकाले महामन्दबुद्धिः आसीत् इति किंवदन्ती। बालकः सः विद्यार्जनाय कमपि आचार्यम् उपागच्छत्। किन्तु अचिरं सः आचार्यगृहात् निष्कासितः अभवत्।

अनेन अपमानेन अतीव दुःखितः पाणिनिः अरण्यं गत्वा कठोर-तपस्याम् अकरोत्। तत्र अन्ये केचन सिद्धपुरुषाः भगवतः शङ्करस्य उपासनां कुर्वन्ति स्म। तेषां सर्वेषां तपस्यया सन्तुष्टः महादेवः आविर्भूय सर्वान् वरयाचनाय अकथयत्। प्रत्येकं तपस्वी स्वकीयं मनोरथं न्यवेदयत्। सर्वेषां मनोरथम् एकसार्थं पूरयितुं महेश्वरः चतुर्दशवारं डमरुम् अवादयत्। पाणिनिः चतुर्दशवारं डमरुनादं श्रुत्वा चतुर्दश सूत्राणि अरचयत्। प्रत्येकं नादः अ इ उ ण् इत्यादि-सूत्ररूपेण तस्य कर्णकुहरं प्रविष्टः। तानि सूत्राणि शिवसूत्राणि माहेश्वर-सूत्राणि वा कथ्यन्ते। एतानि सूत्राणि व्याकरणस्य आदिसूत्राणि मन्यन्ते।

अ इ उ ण् ।१।। ऋ ऌ क् ।२।। ए ओ ङ् ।३।। ऐ औ च् ।४।।
ह य व र ट् ।५।। ल ण् ।६।। ञ म ङ ण न म् ।७।।

झ भ ञ् ।८।। घ ढ ध ष् ।९।। ज ब ग ड द श् ।१०।। ख फ
छ ठ थ च ट त व् ।११।। क प य् ।१२।। श ष स र् ।१३।।
ह ल् ।१४।।

एतानि प्रत्याहार-सूत्राणि अपि कथ्यन्ते।

प्रत्याहारः – प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः अस्मिन् इति प्रत्याहारः *अथवा* प्रत्याह्रियन्ते संक्षिप्य बोध्यन्ते वर्णाः अनेन इति प्रत्याहारः। अल्पाक्षरैः अधिकाक्षराणां बोधः येन भवति स प्रत्याहारः। प्रत्याहारस्य अर्थः – संक्षेपेण कथनम्।

प्रत्याहारस्य प्रथमवर्णः शिव-सूत्रेषु कुतोऽपि ग्रहीतुं शक्यते। तद्यथा, इक्, उक्, हल्, खर् इत्यादयः। इत्थं त्रयश्चत्वारिंशत् (४३) प्रत्याहाराः पाणिनिना स्वव्याकरणे प्रयुक्ताः। तद्यथा –

१.	अण् (1)	अ इ उ
२.	अक्	अ इ उ ऋ ऌ
३.	इक्	इ उ ऋ ऌ
४.	उक्	उ ऋ ऌ
५.	एङ्	ए ओ
६.	अच्	सर्वे स्वराः (अ इ उ ऋ ऌ ए ओ ऐ औ)
७.	इच्	अकारं विहाय सर्वे स्वराः
८.	एच्	ए ओ ऐ औ
९.	ऐच्	ऐ औ
१०.	अट्	सर्वे स्वराः, ह य व र
११.	अण् (2)	सर्वे स्वराः, ह य व र ल
१२.	इण्	अकारं विहाय सर्वे स्वराः, ह य व र ल

१३.	यण्	य व र ल (इमे अन्तःस्थाः कथ्यन्ते)
१४.	अम्	सर्वे स्वराः, ह, अन्तःस्थाः, ञ म ङ ण न
१५.	यम्	अन्तःस्थाः, ञ म ङ ण न (वर्गपञ्चमाः)
१६.	ञम्	ञ म ङ ण न (वर्गाणां पञ्चमवर्णाः)
१७.	ङम्	ङ ण न
१८.	यञ्	अन्तःस्थाः, वर्गपञ्चमाः, झ भ
१९.	झष्	झ भ घ ढ ध (वर्गचतुर्थाः)
२०.	भष्	भ घ ढ ध
२१.	अश्	सर्वे स्वराः, ह, अन्तःस्थाः, वर्गाणां ५, ४, ३
२२.	हश्	ह, अन्तःस्थाः, वर्गाणां ५, ४, ३
२३.	वश्	व र ल, वर्गाणां ५, ४, ३
२४.	जश्	ज ब ग ड द (वर्गतृतीयाः)
२५.	झश्	वर्गाणां ४, ३
२६.	बश्	ब ग ड द
२७.	छव्	छ ठ थ च ट त
२८.	यय्	अन्तःस्थाः, सर्वे वर्गीयवर्णाः
२९.	मय्	ञकारं विहाय सर्वे वर्गीयवर्णाः
३०.	झय्	वर्गाणां ४, ३, २, १
३१.	खय्	वर्गाणां २, १
३२.	चय्	वर्गाणां प्रथमवर्णाः
३३.	यर्	हकारं विहाय सर्वाणि व्यञ्जनानि
३४.	झर्	वर्गाणां ४, ३, २, १, श ष स
३५.	खर्	वर्गाणां २, १, श ष स
३६.	चर्	वर्गाणां प्रथमवर्णाः, श ष स

इत् = अनुबन्ध

३७.	शर्	श ष स
३८.	अल्	सर्वे स्वराः, सर्वाणि व्यञ्जनानि
३९.	हल्	सर्वाणि व्यञ्जनानि
४०.	वल्	यकारं विहाय सर्वाणि व्यञ्जनानि
४१.	रल्	यकारं वकारं च विहाय सर्वाणि व्यञ्जनानि
४२.	झल्	वर्गाणां ४, ३, २, १, ऊष्माणः (श ष स ह)
४३.	शल्	ऊष्माणः (श ष स ह)

अवधेयम्

माहेश्वर-सूत्राणाम् अन्तिमवर्णः इत्संज्ञकः। एति अपगच्छति इति इत्। उच्चारणात् परम् इत्संज्ञक-वर्णस्य लोपः भवति। प्रत्याहारे इतः (इत्संज्ञक-वर्णस्य) ग्रहणं न भवति । तद्यथा, अण् = अ, इ, उ । एङ् = ए, ओ। इत् अनुबन्धोऽपि कथ्यते।

माहेश्वर-सूत्रस्थ-हकारादिषु वर्तमानः अकारः उच्चारणार्थम् उद्दिष्टः। अस्य अर्थः – ह य व र ल, ञ म ङ ण न, झ भ, घ ढ ध, ज ब ग ड द, ख फ छ ठ थ च ट त, क प, श ष स, ह इति एषां वर्णानाम् अन्तिमस्वरः 'अ' उच्चारणार्थं पाणिनिना प्रयुक्तः। किन्तु लण्सूत्रे वर्तमानः 'अ' इत्संज्ञकः। अयम् अकारः अनुनासिकः पठ्यते। उपदेशेऽजनुनासिक इत् (१. ३. २.)[1] इति सूत्रेण अस्य इत्संज्ञा भवति।

---

[1] उपदेशः – पाणिनेः उच्चारणम् उपदेशः कथ्यते। उपदिश्यते अनेन इति उपदेशः। उपदेशे अनुनासिकः अच् इत्संज्ञकः स्यात्। पाणिनिः पठ्, वद्, एध्, भज् इति स्थाने पठँ, वदँ, एधँ, भजँ इति पठति। उपदेशेऽजनुनासिक इत् इति सूत्रेण अँ इति अनुनासिकस्य अचः इत्संज्ञा भवति।

माहेश्वर-सूत्राणि, अष्टाध्यायी, धातुपाठः, उणादिसूत्रम्, गणपाठः, लिङ्गानुशासनम् इति एते उपदेशाः कथ्यन्ते।

यदि लण्सूत्रस्थः अकारः इत्संज्ञकः, प्रत्याहारस्य प्रथमवर्णश्च शिवसूत्रेभ्यः कुतोऽपि ग्रहीतुं शक्यते, तर्हि हयवरट् इति अस्मात् रेफम्, लण् इति अत्र लकारात् परम् इत्संज्ञकम् अकारं गृहीत्वा र इति अन्यः प्रत्याहारः रचयितुं शक्यते। तद्यथा – र् + अ = र । अयं 'र' प्रत्याहारः र्, ल् इति वर्णद्वयस्य ग्राहकः, यथा अण् प्रत्याहारः अ इ उ इति वर्णत्रयस्य ग्राहकः। अयं प्रत्याहारः 'उरण् रपरः' इति सूत्रे स्-शब्दे एव दृश्यते। र-प्रत्याहारं केचन न अङ्गीकुर्वन्ति।

इत्संज्ञकः ण् द्विवारं वर्तते, तेन

(1) अण् – अ इ उ

(2) अण् – सर्वे स्वराः, ह य व र ल इति प्रत्याहारद्वयं शक्यम्।

अनयोः द्वयोः प्रत्याहारयोः कः ग्रहणीयः – प्रथमो वा द्वितीयो वा ?

उत्तरम् – "अणुदित् सवर्णस्य चाप्रत्ययः" (१. १. ६९) इति सूत्रे द्वितीयः अण् गृह्यते। अन्यत्र प्रथमः अण् ग्रहणीयः।

एवमेव इण् द्विधा रचयितुं शक्यते। तद्यथा –

१. इण् – इ उ

२. इण् – अकारं विहाय सर्वे स्वराः, ह य व र ल ।

अत्र कः ग्रहणीयः – प्रथमो वा द्वितीयो वा ?

उत्तरम् – पाणिनि-व्याकरणे 'इण्' प्रत्याहारः सर्वदा द्वितीय-णकारेण ग्रहणीयः। इण् – इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह य व र ल।

शिवसूत्रेषु हकारस्य प्रयोगः द्विवारं कुतः ?

उत्तरम् – अट्, अण्, इण्, अश्, हश् इत्यादिषु प्रत्याहारेषु ग्रहणाय प्रथमः हकारः। एषु प्रत्याहारेषु पाणिनिः हकारम् इच्छति।

एवं वल्, झल्, शल् इत्यादिषु प्रत्याहारेषु ग्रहणाय द्वितीयः हकारः। एषु प्रत्याहारेषु अपि पाणिनिः हकारम् इच्छति। अतः तेन हकारस्य प्रयोगः द्विवारं कृतः।

वर्गीयवर्णाः

क	ख	ग	घ	ङ	(कु इति पाणिनिः)
च	छ	ज	झ	ञ	(चु „ „)
ट	ठ	ड	ढ	ण	(टु „ „)
त	थ	द	ध	न	(तु „ „)
प	फ	ब	भ	म	(पु „ „)

कात्यायनः – पाणिनेः परवर्तिकाले सूत्राणां बोधाय काचित् न्यूनता अनुभूता। मुनिः कात्यायनः तां न्यूनतां दूरीकर्तुं कानिचित् सूत्राणि अरचयत्। तानि वार्तिकानि कथ्यन्ते। तानि पतञ्जलेः महाभाष्ये लभ्यन्ते।

कात्यायनः दाक्षिणात्यः आसीत्। तस्य जन्म ख्रिस्तपूर्व-चतुर्थ-शताब्द्याः ख्रिस्तपूर्व-तृतीय-शताब्द्याः च मध्ये अभवत्।

पतञ्जलिः – ख्रिस्तपूर्व-द्वितीयशतके पतञ्जलेः जन्म। पाणिनि-सूत्राणां कात्यायन-वार्तिकानां च व्याख्याकारः मुनिः पतञ्जलिः। तस्य व्याख्याग्रन्थस्य नाम 'व्याकरण-महाभाष्यम्'।

अष्टाध्यायी

पाणिनि-व्याकरण-ग्रन्थस्य नाम अष्टाध्यायी। अष्टानाम् अध्यायानां समाहारः इति अष्टाध्यायी। अस्मिन् ग्रन्थे अष्ट अध्यायाः सन्ति। एकैकस्मिन् अध्याये चत्वारः पादाः, एकैकस्मिन् पादे च विभिन्न-सङ्ख्यकानि सूत्राणि सन्ति। अष्टाध्याय्याः सूत्राणां लेखने एकैकस्य सूत्रस्य तिस्रः सङ्ख्याः दीयन्ते। ताः क्रमशः अध्यायम्, पादं सूत्रं च सूचयन्ति। तद्यथा – अणुदित् सवर्णस्य चाप्रत्ययः ।। १. १. ६९ (अस्यार्थः – प्रथमाध्याये, प्रथमपादे, ऊनसप्ततितमं सूत्रम्)

लभ्यमानेषु सर्वेषु व्याकरण-ग्रन्थेषु पाणिनेः अष्टाध्यायी-ग्रन्थः प्राचीनतमः श्रेष्ठः च। यथानुश्रूयते –

अष्टाध्यायी जगन्मातामरकोषो जगत्पिता ।
भट्टिकाव्यं गणेशश्च त्रयीयं सुखदाऽस्तु वः ।।

अद्यत्वे प्रसिद्धाः सङ्गणित्र-वैज्ञानिकाः (computer scientists) अष्टाध्यायी-ग्रन्थस्य भूयसीं प्रशंसां कुर्वन्ति। एषः पृथिव्याम् अद्वितीयः विज्ञानसम्मतः व्याकरणग्रन्थः यः सङ्गणित्रस्य अर्थे पूर्णतया उपयोगी इति ते कथयन्ति।

पाणिनीय-सूत्राणि

तपरस्तत्कालस्य ।। १. १. ७० ।। संज्ञासूत्रम् ।

तपरः + तत्कालस्य। यस्मात् परं तकारः वर्तते सः तन्मात्रात्मक-कालयुतस्य वर्णस्य एव ग्राहकः भवति न तु अन्यमात्रात्मक-कालयुतस्य वर्णस्य। अस्यार्थः – यदि ह्रस्वस्वरात् परं त् अस्ति तर्हि एकमात्रात्मकः ह्रस्वस्वरः एव ग्रहणीयः। तद्यथा – अत्। अत्र

एकमात्रात्मकः अकारः एव ग्रहणीयः न तु द्विमात्रात्मकः आकारः। यदि आत् इति दीर्घस्वरात् परं त् अस्ति तर्हि द्विमात्रात्मकः आकारः एव ग्रहणीयः न तु एकमात्रात्मकः अकारः। इत्थम् इत्, ईत्, उत्, ऊत् इत्यादिषु बोद्धव्यम्।

मात्रा – ह्रस्वस्य अचः उच्चारणे आवश्यकः समयः एका मात्रा।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥

ह्रस्वः	*दीर्घः*	*प्लुतः*[1] *(ह्रस्वस्य, दीर्घस्य)*
अ	आ	अ३, आ३
इ	ई	इ३, ई३
उ	ऊ	उ३, ऊ३
ऋ	ॠ	ऋ३, ॠ३

पाणिनिमतेन अ, इ, उ, ऋ इति एषु वर्णेषु एकैकस्य अष्टादश भेदाः सन्ति। तद्यथा –

१.	ह्रस्वः	उदात्तः	अनुनासिकः
२.	,,	,,	अननुनासिकः
३.	,,	अनुदात्तः	अनुनासिकः
४.	,,	,,	अननुनासिकः
५.	,,	स्वरितः	अनुनासिकः
६.	,,	,,	अननुनासिकः
७.	दीर्घः	उदात्तः	अनुनासिकः
८.	,,	,,	अननुनासिकः

[1] दूराद्धूते ॥ ८. २. ८४॥ दूरात् हूते (आह्वाने) प्लुतः भवति। तद्यथा – हे बाल३, अत्र आगच्छ। हे बाला३:, अत्र आगच्छत।

९.	दीर्घः	अनुदात्तः	अनुनासिकः
१०.	”	”	अननुनासिकः
११.	”	स्वरितः	अनुनासिकः
१२.	”	”	अननुनासिकः
१३.	प्लुतः	उदात्तः	अनुनासिकः
१४.	”	”	अननुनासिकः
१५.	”	अनुदात्तः	अनुनासिकः
१६.	”	”	अननुनासिकः
१७.	”	स्वरितः	अनुनासिकः
१८.	”	”	अननुनासिकः

ऌवर्णस्य द्वादश भेदाः तस्य दीर्घाभावात्। एचाम् (ए, ओ, ऐ, औ इति एषाम्) अपि द्वादश भेदाः तेषां ह्रस्वाभावात्।

अतः यदा अत् इति कथ्यते तदा षड्भेदात्मकः ह्रस्वः अकारः एव गृह्यते। एवम् एव, यदा आत् इति कथ्यते तदा षड्भेदात्मकः दीर्घः आकारः एव गृह्यते।

उच्चैरुदात्तः ॥ १. २. २९ ॥ संज्ञासूत्रम् ।

उच्चैः + उदात्तः। कण्ठः, तालु, मूर्धा, दन्ताः, ओष्ठौ नासिका च वर्णानाम् (अक्षराणाम्) उच्चारण-स्थानानि। तेषु ऊर्ध्वभागे निष्पन्नः (उच्चार्यमाणः) अच् (स्वरवर्णः) उदात्तसंज्ञकः भवति। तद्यथा – इकारस्य उच्चारण-स्थानं तालु। यदि तालुनः ऊर्ध्वभागे इकारः उच्चार्यते तर्हि स उदात्तसंज्ञकः भवति।

अष्टाध्यायी

पाणिनि-व्याकरण-ग्रन्थस्य नाम अष्टाध्यायी। अष्टानाम् अध्यायानां समाहारः इति अष्टाध्यायी। अस्मिन् ग्रन्थे अष्ट अध्यायाः सन्ति। एकैकस्मिन् अध्याये चत्वारः पादाः, एकैकस्मिन् पादे च विभिन्न-सङ्ख्यकानि सूत्राणि सन्ति। अष्टाध्याय्याः सूत्राणां लेखने एकैकस्य सूत्रस्य तिस्रः सङ्ख्याः दीयन्ते। ताः क्रमशः अध्यायम्, पादं सूत्रं च सूचयन्ति। तद्यथा – अणुदित् सवर्णस्य चाप्रत्ययः ॥ १. १. ६९ (अस्यार्थः – प्रथमाध्याये, प्रथमपादे, ऊनसप्ततितमं सूत्रम्)

लभ्यमानेषु सर्वेषु व्याकरण-ग्रन्थेषु पाणिनेः अष्टाध्यायी-ग्रन्थः प्राचीनतमः श्रेष्ठः च। यथानुश्रूयते –

अष्टाध्यायी जगन्मातामरकोषो जगत्पिता ।
भट्टिकाव्यं गणेशश्च त्रयीयं सुखदाऽस्तु वः ॥

अद्यत्वे प्रसिद्धाः सङ्गणित्र-वैज्ञानिकाः (computer scientists) अष्टाध्यायी-ग्रन्थस्य भूयसीं प्रशंसां कुर्वन्ति। एषः पृथिव्याम् अद्वितीयः विज्ञानसम्मतः व्याकरणग्रन्थः यः सङ्गणित्रस्य अर्थे पूर्णतया उपयोगी इति ते कथयन्ति।

पाणिनीय-सूत्राणि

तपरस्तत्कालस्य ॥ १. १. ७० ॥ संज्ञासूत्रम् ।

तपरः + तत्कालस्य। यस्मात् परं तकारः वर्तते सः तन्मात्रात्मक-कालयुतस्य वर्णस्य एव ग्राहकः भवति न तु अन्यमात्रात्मक-कालयुतस्य वर्णस्य। अस्यार्थः – यदि ह्रस्वस्वरात् परं त् अस्ति तर्हि एकमात्रात्मकः ह्रस्वस्वरः एव ग्रहणीयः। तद्यथा – अत्। अत्र

अद्यत्वे लौकिक-व्यवहारे उदात्तादि-स्वराः न उच्चार्यन्ते, वेदपाठे तु अवश्यम् उच्चार्यन्ते। प्राचीनतमस्य बृहत्तमस्य च ऋग्वेदस्य मन्त्राणां लेखने उदात्तस्वरस्य सूचनाय किमपि चिह्नं न प्रयुज्यते।

नीचैरनुदात्तः ॥ १. २. ३० ॥ संज्ञासूत्रम्।

नीचैः + अनुदात्तः। कण्ठः, तालु, मूर्धा इत्यादिषु उच्चारण-स्थानेषु अधोभागे उच्चार्यमाणः अच् अनुदात्तसंज्ञकः भवति। तद्यथा – इकारस्य उच्चारण-स्थानं तालु। यदि तालुनः अधोभागे इकारः उच्चार्यते तर्हि सः अनुदात्तसंज्ञकः भवति।

ऋग्वेद-मन्त्रेषु अक्षराणाम् अधस्तात् प्रदत्ता रेखा अनुदात्त-स्वरस्य सूचिका। तद्यथा – अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् । ऋग्वेदः १. १. १

समाहारः स्वरितः ॥ १. २. ३१ ॥ संज्ञासूत्रम् ।

उदात्तः अनुदात्तः च यं स्वरम् आश्रयतः स स्वरितसंज्ञकः। स्वरिते उदात्तस्य अनुदात्तस्य च समाहारः (समन्वयः) भवति। तत्र पूर्वभागः उदात्तः उत्तरभागः च अनुदात्तः।

ऋग्वेद-मन्त्रेषु अक्षराणाम् उपरि दण्डायमाना रेखा स्वरितस्वरस्य सूचिका। तद्यथा– अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।

वृद्धिरादैच् ॥ १. १. १ ॥ संज्ञासूत्रम् ।

इदं पाणिनेः अष्टाध्याय्यां प्रथमसूत्रम्। वृद्धिः + आत् + ऐच् । आत्, ऐच् (ऐ, औ) वृद्धिसंज्ञकः स्यात्। तपर-करणात्[1] केवलम् आकारः

---

[1] तपरस्तत्कालस्य । पृष्ठम् १३

ग्रहणीयः। अतः आ, ऐ, औ इति एते त्रयः वृद्धिनामकाः। अस्यार्थः – आ, ऐ, औ इति एषां त्रयाणां 'वृद्धिः' इति नाम (संज्ञा)।

अदेङ् गुणः ॥ १. १. २ ॥ संज्ञासूत्रम्।

अत् + एङ् गुणः। अत्, एङ् (ए, ओ) गुणसंज्ञकः स्यात्। तपरकरणात् केवलम् अकारः ग्रहणीयः। अतः अ, ए, ओ इति एते त्रयः गुणनामकाः। अस्यार्थः – अ, ए, ओ इति एषां त्रयाणां 'गुणः' इति नाम (संज्ञा)।

उरण् रपरः ॥ १. १. ५१ ॥ विधिसूत्रम्।

उः + अण् रपरः। रः परः यस्मात् स रपरः। रः इति र प्रत्याहारः। उः इति ऋकारस्य षष्ठीविभक्तेः एकवचन-रूपम्। यथा, मातृ–मातुः।

अनुवृत्तिः[1] – स्थाने। अर्थः – ऋ-स्थाने यदि अण् (अ, इ, उ) इति आदेशः[2] भवति तर्हि स रपरः स्यात्।

रपरः इत्यत्र र इति प्रत्याहारः। तेन रेफ-लकारयोः (र्, ल् इति अनयोः) ग्रहणं भवति।

---

[1] अनुवृत्तिः – कस्यापि सूत्रस्य बोधार्थं पूर्वसूत्रात् पूर्वसूत्रेभ्यः वा कस्यापि अंशस्य सम्पूर्ण-सूत्रस्य वा ग्रहणम् अनुवृत्तिः कथ्यते। तद्यथा – अत्र उरण् रपरः (१. १. ५१) इति सूत्रस्य बोधार्थं स्थानेऽन्तरतमः (१. १. ५०) इति सूत्रात् 'स्थाने' इति पदं गृहीतम्।

[2] आदेशः – आदेशः शत्रुवत्। एषः अन्यम् अपनीय तस्य स्थानम् अधिकरोति। तद्यथा– ऋ-स्थाने अण्।

'ऋ-ऌ-वर्णयोः मिथः सावर्ण्यं वाच्यम्' इति कात्यायनस्य वार्तिकानुसारेण ऋ-ऌ-वर्णयोः सवर्णत्वात् ऋकारेण ऌकारोऽपि गृह्यते। तेन ऋकार-ऌकारयोः स्थाने जायमानः अण् (अ, इ, उ) यथाक्रमं रेफपरः (अर्, इर्, उर्), लकारपरः (अल्, इल्, उल्) भवति ।

उदाहरणतः –

सप्त + ऋषि (सप्त्अ + ऋषि) । अत्र अकारात् परम् ऋकारः वर्तते। अतः 'आद् गुणः' इति सूत्रेण पूर्वस्य अकारस्य परस्य ऋकारस्य च स्थाने एकः गुणः आदेशः भवति। अधुना अर्, ए, ओ इति गुणेषु कः गुणः आदेशः भवेत् ?

अ + ऋ इत्यत्र अकारस्य उच्चारण स्थानं कण्ठः, ऋकारस्य उच्चारणस्थानं मूर्धा । तेन स्थानसाम्यात् अर् भवेत् यतो हि अकारः कण्ठ्यः, रेफः मूर्धन्यः ।

सप्त + ऋषि
= सप्त् + (अ+ऋ)षि
= सप्त् + (अर्)षि (आद् गुणः, उरण् रपरः)
= सप्तर्षि।

एवम् एव –

तव + ऌकार
= तव् + (अ+ऌ)कार
= तव् + (अल्)कार (आद् गुणः, उरण् रपरः)
= तवल्कार।

परः सन्निकर्षः संहिता ॥ १. ४. १०९ ॥ संज्ञासूत्रम्।

वर्णानाम् अत्यन्त-सन्निकर्षता (अतिशय-समीपता) संहिता[1] कथ्यते। संहिता सन्धिः च समानार्थकौ शब्दौ।

आद् गुणः ॥ ६. १. ८७ ॥ विधिसूत्रम्[2]।

अनुवृत्तिः – एकः पूर्वपरयोः (६. १. ८४), अचि (६. १. ७७), संहितायाम् (६. १. ७२) । अर्थः – आत् अचि परे संहितायां पूर्वपरयोः गुणः एकादेशः भवति।

अ-वर्णात् परं यदि कोऽपि स्वरवर्णः स्यात् तर्हि तयोः स्थाने गुणः एकादेशः भवति। तद्यथा –

देव + इन्द्र
= देव् + (अ+इ)न्द्र
= देव् + (ए)न्द्र
= देवेन्द्र ।

अकारस्य उच्चारणस्थानं कण्ठः, इकारस्य उच्चारणस्थानं तालु, एकारस्य उच्चारणस्थानं कण्ठतालु। अतः स्थानसाम्यात् अकारस्य इकारस्य च स्थाने एकारः गुणः आदेशः भवति।

---

[1] द्वयोः वर्णयोः उच्चारणस्य मध्ये अर्धमात्राकालः अनिवार्यः। तदा संहिता भवति। द्वयोः वर्णयोः उच्चारणस्य मध्ये अर्धमात्रातः अधिकः कालः गच्छति चेत् तत्र संहिता न भवति।

[2] **विधिसूत्रम्** – कस्यापि विषयस्य प्रवर्तनं विधिः कथ्यते। येन प्रत्ययः, आदेशः, आगमः, लोपः समासः वा विधीयते तत् विधिसूत्रम्। विधिसूत्रं स्वतन्त्रतया कार्यं करोति।

सूर्य + उदय = सूर्योदय । अकारस्य उच्चारणस्थानं कण्ठः, उकारस्य उच्चारणस्थानं ओष्ठौ, ओकारस्य उच्चारणस्थानं कण्ठोष्ठम्। अतः स्थानसाम्यात् अकारस्य उकारस्य च स्थाने ओकारः गुणः आदेशः भवति।

इत्संज्ञा-विधायक-सूत्राणि

हलन्त्यम् ॥ १. ३. ३. ॥ संज्ञासूत्रम् ।

अनुवृत्तिः – उपदेशे, इत्। उपदेशेऽजनुनासिक इत् (१. ३. २) इति सूत्रं 'हलन्त्यम्' इति सूत्रात् पूर्वं वर्तते। तस्मात् सूत्रात् उपदेशे, इत् इति पदद्वयम् अनुवृत्तम्। अर्थः – उपदेशे अन्त्यं हल् इत्संज्ञकं भवति। उपदेशे अन्तिम-व्यञ्जन-वर्णस्य इत्संज्ञा भवति। तद्यथा – डुकृञ्।

पाणिनिः कृ-धातुं डुकृञ् इति पठति। अस्य अन्तिमः हल् ञ् 'हलन्त्यम्' इति सूत्रेण इत्संज्ञकः भवति, 'तस्य लोपः' इति सूत्रेण च लुप्यते।

तस्य लोपः ॥ १. ३. ९ ॥ विधिसूत्रम् ।

अनुवृत्तिः – इत् (१. ३. २)। तस्य इतः (इत्संज्ञकस्य) लोपः भवति।

आदिर्ञिटुडवः ॥ १. ३. ५ ॥ संज्ञासूत्रम् ।

अनुवृत्तिः – उपदेशे, इत् (१. ३. २)। अर्थः – उपदेशे आदयः (आदौ वर्तमानाः) ञिटुडवः इत्संज्ञकाः भवन्ति । उपदेशे आदौ वर्तमानाः ञि, टु, डु इति एषाम् इत्संज्ञा भवति । तद्यथा – डुकृञ् । अस्य आदौ वर्तमानः डुः 'आदिर्ञिटुडवः' इति सूत्रेण इत्संज्ञकः भवति, 'तस्य लोपः' इति सूत्रेण च लुप्यते। तद्यथा –

डुकृञ्

= डुकृ (हलन्त्यम् इति सूत्रेण ञ् इत्यस्य इत्संज्ञा, तस्य लोपः इति सूत्रेण ञ् इत्यस्य लोपः)
= कृ (आदिर्ञिटुडवः इति सूत्रेण डु इत्यस्य इत्संज्ञा, तस्य लोपः इति सूत्रेण डु इत्यस्य लोपः)

चुटू ॥ १. ३. ७ ॥ संज्ञासूत्रम् ।

अनुवृत्तिः – प्रत्ययस्य (१. ३. ६), आदिः (१. ३. ५), उपदेशे, इत् (१. ३. २)। अर्थः – उपदेशे प्रत्ययस्य आदौ चुटू इत्संज्ञकौ भवतः। उपदेशे प्रत्ययस्य आदौ वर्तमानस्य च-वर्गस्य ट-वर्गस्य च इत्संज्ञा भवति। तद्यथा–ण्वुल्। अयमेकः प्रत्ययः। अस्य आदौ वर्तमानः ण् चुटू इति सूत्रेण इत्संज्ञकः भवति, तस्य लोपः इति सूत्रेण च लुप्यते। टु = ट, ठ, ड, ढ, ण ।

ण्वुल्
= ण्वु (हलन्त्यम् इति सूत्रेण लकारस्य इत्संज्ञायां लोपः)
= वु (चुटू इति सूत्रेण णकारस्य इत्संज्ञायां लोपः)

लशक्वतद्धिते ॥ १. ३. ८ ॥ संज्ञासूत्रम् ।

ल-श-कु+अतद्धिते[1]। अनुवृत्तिः – प्रत्ययस्य (१. ३. ६), आदिः (१. ३. ५), उपदेशे, इत् (१. ३. २) । अर्थः – उपदेशे प्रत्ययस्य आदिः ल्, श्, कुः इत्संज्ञकः भवति अतद्धिते। तद्धित-प्रत्ययान् वर्जयित्वा अन्येषां प्रत्ययानाम् आदौ वर्तमानः ल्, श्, क-वर्गः इत्संज्ञकः भवति। तद्यथा–घञ्। अयमेकः प्रत्ययः। अस्य आदौ वर्तमानः घ् लशक्वतद्धिते इति सूत्रेण इत्संज्ञकः भवति, तस्य लोपः इति सूत्रेण च लुप्यते।

---

[1] न तद्धितः अतद्धितः। पदात् पदान्तरस्य निर्माणं तद्धितप्रकरणस्य विषयः। तद्यथा – दशरथ + इञ् = दाशरथि । अत्र पुत्रार्थे दशरथ-शब्दात् इञ्-प्रत्ययः प्रयुक्तः।

घञ्
= घ (हलन्त्यम् इति सूत्रेण ञकारस्य इत्संज्ञायां लोपः)
= घ् + अ
= अ (लशक्वतद्धिते इति सूत्रेण घकारस्य इत्संज्ञायां लोपः)

अदर्शनं लोपः ॥ १. १. ६० ॥ संज्ञासूत्रम् ।

अदर्शनं लोपसंज्ञकं भवति । अस्यार्थः – शास्त्रेण विहितस्य प्रयोगकाले अदर्शनं लोपः कथ्यते। अतः यस्य लोपः भवति तस्य अस्तित्वं श्रवणपथं दृष्टिपथं वा न आगच्छतु इति पाणिनिः सूचयति।

कृत्प्रकरणम्

क्तिन्

स्त्रियां क्तिन् ॥ ३. ३. ९४ ॥ विधिसूत्रम्।

स्त्रीलिङ्गे भावे[1] क्तिन् स्यात्।

अनुवृत्तिः – प्रत्ययः (३. १. १), परश्च (३. १. २), धातोः (३. १. ९१), भावे (३. ३. १८), अकर्तरि च कारके संज्ञायाम् (३. ३. १९)।

धातोः भावे, अकर्तरि कारके च संज्ञायां स्त्रियां क्तिन् प्रत्ययः परश्च भवति।

---

[1] धात्वर्थः भाव उच्यते। स द्विविधः – (१) साध्यावस्थापन्नः (२) सिद्धावस्थापन्नः।

साध्यावस्थापन्नः धात्वर्थः – पठति, हसति, भवति इत्यादि।

सिद्धावस्थापन्नः धात्वर्थः – पाठः, हासः, भावः, पठनम्, गमनम् इत्यादि। सिद्धावस्थापन्न-धात्वर्थानां लिङ्गं वचनं च भवति। सिद्धावस्थापन्ने भावे क्तिन् प्रत्ययः स्यात्।

धातोः कर्तृभिन्न-कारके संज्ञायाम्, भावे च क्तिन् प्रत्ययः भवति, स च धातोः परं तिष्ठति। क्तिन्-प्रत्ययान्तः शब्दः स्त्रीलिङ्गे प्रयुज्यते। कित्(क्+इत्)कारणात् क्तिन्-प्रत्ययः गुणवृद्धिनिषेधकः।

क्तिन्-प्रत्ययस्य ति अवशिष्यते। तद्यथा –

ख्या + क्तिन्
= ख्या + क्ति (हलन्त्यम्)
= ख्या + ति (लशक्वतद्धिते)
= ख्याति ।

एवम् एव –

वि + आप् + क्तिन् = व्याप्ति
प्रति + इ + क्तिन् = प्रतीति
कृ + क्तिन् = कृति
च्यु + क्तिन् = च्युति
तृप् + क्तिन् = तृप्ति
दीप् + क्तिन् = दीप्ति
नी + क्तिन् = नीति
प्री + क्तिन् = प्रीति
भी + क्तिन् = भीति
अनु + भू + क्तिन् = अनुभूति
प्र + वृत् + क्तिन् = प्रवृत्ति
शक् + क्तिन् = शक्ति
श्रु + क्तिन् = श्रुति
प्र + सू + क्तिन् = प्रसूति
प्र + सृ + क्तिन् = प्रसृति (प्रसार)

स्तु + क्तिन् = स्तुति

वि + स्तृ + क्तिन् = विस्तृति (विस्तार)

स्मि + क्तिन् = स्मिति

स्मृ + क्तिन् = स्मृति

आ + हु + क्तिन् = आहुति

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

विकृति, विच्युति, प्राप्ति, निवृत्ति, प्रतिश्रुति।

घञ्

अयं प्रत्ययः सर्वेभ्यः धातुभ्यः भवति। घञ्-प्रत्ययान्तः शब्दः पुंलिङ्गः। घञ्-प्रत्ययस्य अ अवशिष्यते। तद्यथा –

विद् + घञ्

= विद् +घ (हलन्त्यम्)

= विद् + घ् + अ

= विद् +अ (लशक्वतद्धिते)

= व् + इ + द् + अ

= व् + ए + द् + अ (लघूपधस्य गुणः[1])

= वेद।

गुणः – धातोः इ-स्थाने ए

क्लिश् + घञ् = क्लेश

---

[1] पुगन्तलघूपधस्य च ॥ ७. ३. ८६ ॥ विधिसूत्रम् ।

पुगन्तस्य (पुक् इति आगमयुक्तस्य) लघूपधस्य च अङ्गस्य इकः स्थाने सार्वधातुके आर्धधातुके च प्रत्यये परे सति गुणः भवति। (लघूपधः – लघुः उपधा यस्य सः)

सम् + क्षिप् + घञ् = संक्षेप
खिद् + घञ् = खेद
छिद् + घञ् = छेद
सम् + दिश् + घञ् = सन्देश
दिव् + घञ् = देव
द्विष् + घञ् = द्वेष
सम् + दिह् + घञ् = सन्देह
भिद् + घञ् = भेद
मिल् + घञ् =मेल
उत् + मिष् + घञ् = उन्मेष
उत् + लिख् + घञ् = उल्लेख
लिश् + घञ् = लेश
अव + लिह् + घञ् = अवलेह
विश् + घञ् = वेश
शिष् + घञ् =शेष
श्लिष् + घञ् = श्लेष
प्र + सिव् + घञ् = प्रसेव
स्निह् + घञ् = स्नेह
स्विद् + घञ् = स्वेद

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

आक्षेप, विक्षेप, देश, आदेश, उपदेश, निर्देश, प्रदेश, विदेश, विद्वेष, देह, विभेद, निमेष, लेख, प्रवेश, परिवेश, अभिनिवेश, अवशेष, विशेष।

गुणः – धातोः उ-स्थाने ओ । तद्यथा –

कुप् + घञ्

= कुप् + घ (हलन्त्यम्)
= कुप् + घ् + अ
= कुप् + अ (लशक्वतद्धिते)
= क् + उ + प् + अ
= क् + ओ + प् + अ (पुगन्तलघूपधस्य च)
= कोप ।

एवम् एव –

आ + क्रुश् + घञ् = आक्रोश
क्रुध् + घञ् = क्रोध
क्षुभ् + घञ् = क्षोभ
घुष् + घञ् = घोष
सम् + तुष् + घञ् = सन्तोष
दुष् + घञ् = दोष
द्रुह् + घञ् = द्रोह
वि + नुद् + घञ् = विनोद
बुध् + घञ् = बोध
आ + मुद् + घञ् = आमोद
मुह् + घञ् = मोह
रुध् + घञ् = रोध
रुष् + घञ् = रोष
सम् + आ + रुह् + घञ् = समारोह
लुप् + घञ् = लोप
लुभ् + घञ् = लोभ
शुध् + घञ् = शोध

शुष् + घञ् = शोष

वि + स्फुट् + घञ् = विस्फोट

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

विक्षोभ, विद्रोह, प्रमोद, अनुरोध, विरोध, प्रतिशोध।

गुणः – धातोः ऋ-स्थाने अर् । तद्यथा –

हृष् + घञ्

= हृष् + घ (हलन्त्यम्)

= हृष् + घ् + अ

= हृष् + अ (लशक्वतद्धिते)

= ह् + ऋ + ष् + अ

= ह् + अर् + ष् + अ (पुगन्तलघूपधस्य च, उरण् रपरः)

= हर्ष ।

एवम् एव –

आ + दृश् + घञ् = आदर्श

उत् + कृष् + घञ् = उत्कर्ष

वि + मृश् + घञ् = विमर्श

सम् + मृद् + घञ् = सम्मर्द

दृप् + घञ् = दर्प

वृष् + घञ् = वर्ष

स्पृश् + घञ् = स्पर्श

वृद्धिः – धातोः अ-स्थाने आ । तद्यथा –

लभ् + घञ्

= ल् + अ + भ् + घञ्

= ल्+आ+भ्+घञ् (अत उपधायाः)[1]
= ल् + आ + भ् + घ (हलन्त्यम्)
= ल् + आ + भ् + अ (लशक्वतद्धिते)
= लाभ ।

एवम् एव –

अभि + अस् +घञ् = अभ्यास
सम् + नि + अस् + घञ् = सन्न्यास
ग्रस् + घञ् = ग्रास
घस् + घञ् = घास
अति + आ + चर् + घञ् = अत्याचार
सम् + तन् + घञ् = सन्तान
उत् + तप् + घञ् = उत्ताप
सम् + त्रस् + घञ् = सन्त्रास
दह् + घञ् = दाह
नद् + घञ् = नाद
नश् + घञ् = नाश
परि + नम् + घञ् = परिणाम
पठ् + घञ् = पाठ
अनु + पत् +घञ् = अनुपात

---

[1] अत उपधायाः ॥ ७. २. ११६ ॥ विधिसूत्रम् ।

अतः उपधायाः। अनुवृत्तिः – ञ्णिति (७. २. ११५), वृद्धिः (७. २. ११४), अङ्गस्य (६. ४. १) । अर्थः – यदि ञकारलोपी णकारलोपी वा प्रत्ययः परतः स्यात् तर्हि अङ्गस्य उपधायाः अकारस्य स्थाने वृद्धिः (आकारः) भवति।

उत् + मद् + घञ् = उन्माद
सम् + मन् + घञ् = सम्मान
मस् + घञ् = मास
निर् + यस् + घञ् = निर्यास
आ + रम् + घञ् = आराम
सम् + लप् + घञ् = संलाप
अभि + लष् +घञ् = अभिलाष
उत् + लस् + घञ् = उल्लास
सम् + वद् + घञ् = संवाद
वस् + घञ् = वास
वि + वह् + घञ् = विवाह
शप् + घञ् = शाप
श्वस् + घञ् = श्वास
प्र + सद् + घञ् = प्रसाद
निर् + उत् + सह् + घञ् = निरुत्साह
स्वद् + घञ् = स्वाद
हस् + घञ् = हास

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

न्यास, उपन्यास, विन्यास, समास, आकाश, प्रकाश, आयास, आचार, प्रचार, विचार, समाचार, सञ्चार, तान, ताप, अनुताप, सन्ताप, त्रास, निनाद, विनाश, प्रणाम, उत्पात, प्रपात, प्रमाद, मान, अपमान, अभिमान, प्रयास, विराम, आलाप, प्रलाप, विलाप, विलास, वाद, अनुवाद, प्रतिवाद, विवाद, उपवास, निवास, प्रवास, प्रवाह, अभिशाप, विश्वास, उत्साह, उपहास, परिहास।

वृद्धिः – ऋ-स्थाने आर् । तद्यथा –

अधि +कृ + घञ्

= अधि + क् + ऋ + घञ्

= अधि+क्+आर्+घञ् (अचो ञ्णिति[1], वृद्धिरादैच्, उरण् रपरः)

= अधि + क् +आर् +घ (हलन्त्यम्)

= अधि + क् + आर् + घ् + अ

= अधि + क् + आर् + अ (लशक्वतद्धिते)

= अधिकार ।

एवम् एव –

अप + कृ + घञ् = अपकार

वि + आ + पृ + घञ् = व्यापार

सम् + भृ + घञ् = सम्भार

वृ + घञ् = वार

सम् + सृ + घञ् = संसार

वि + स्तृ + घञ् = विस्तार

सम् + हृ + घञ् = संहार

वि + अव + हृ + घञ् = व्यवहार

परपृष्ठे प्रदत्तानां शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

---

[1] अचो ञ्णिति ॥ ७. २. ११५ ॥ विधिसूत्रम्।

अचः ञ्णिति। ञश्च णश्च ञ्णौ, ञ्णौ इतौ यस्य स ञ्णित्, तस्मिन्। अनुवृत्तिः – वृद्धिः (७. २. ११४), अङ्गस्य (६. ४. १)। अर्थः – ञिति णिति च प्रत्यये परे सति अजन्तस्य अङ्गस्य वृद्धिः भवति।

अवधेयम् – यत्र वृद्धिः प्रवर्तते तत्र सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणः न भवति यतो हि गुणस्य अपवादः वृद्धिः।

अजन्त + घञ् = वृद्धि
हलन्त + घञ् = यदि उपधा 'अ' वृद्धि

हलन्त + घञ् = यदि उपधा अन्यस्वर गुण

आकार, उपकार, प्रकार, विकार, आधार, भार, परिवार, सार, अनुसार, प्रसार, हार, आहार, उपहार, प्रहार, विहार, समाहार ।

अवधेयम्

घञ्-प्रत्यये परे सति सर्वेषाम् अजन्त-धातूनां वृद्धिः भवति। तद्यथा, भू – भाव, हृ – हार, अधि + कृ – अधिकार । हलन्त-धातूनाम् 'अत उपधायाः' इति सूत्रेण उपधायाः अकारस्य वृद्धिः भवति। तद्यथा, पठ् – पाठ, वस् – वास, हस् – हास । अन्येषाम् इकार-उकार-ऋकाराणां 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणः भवति । तद्यथा, विद् – वेद, छिद् – छेद, कुप् – कोप, लुभ् – लोभ, दृप् – दर्प, स्पृश् – स्पर्श।

अलोऽन्त्यात् पूर्व उपधा ॥ १. १. ६५ ॥ संज्ञासूत्रम् ।

अन्त्यात् अलः पूर्वः [वर्णः] उपधा। अन्त्यात् अलः पूर्वः यः अल् सः उपधासंज्ञकः भवति। अल् इति सर्वे स्वरवर्णाः सर्वे व्यञ्जनवर्णाः च। अन्तिमवर्णात् पूर्ववर्णः उपधा कथ्यते। तद्यथा – विद्। अस्य अन्तिम-वर्णः द् । दकारात् पूर्ववर्णः इ उपधा। (विद् = व् + इ + द्) । एवम् एव, वदि इत्यस्य द् उपधा (वदि = व् + अ + द् + इ)

यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ १. ४. १३ ॥ संज्ञासूत्रम् ।

यस्मात् [धातोः प्रातिपदिकात् वा] प्रत्ययविधिः (प्रत्ययः विधीयते, प्रत्ययस्य प्रयोगः क्रियते) तस्मात् आरभ्य प्रत्ययपर्यन्तम् (प्रत्ययं विहाय) अङ्गं कथ्यते। तद्यथा –

कृ + तृच् । अत्र तृच्-प्रत्ययः कृ इत्यस्मात् धातोः विहितः । अतः 'कृ' अङ्गम्।

कृ + तिप् (तिप्तस्झि० ३. ४. ७८)

कृ + स्य + तिप् (स्यतासी लृलुटोः ३. १. ३३)

कृ + इ + स्य + तिप् (ऋद्धनोः स्ये ७. २. ७० इति सूत्रेण इडागमः)

= क् + ऋ + इ + स्य + तिप्

= क् + अर् + इ + स्य + तिप् (सार्वधातुकार्धधातुकयोः)

= करिष्य[1] + तिप्। अत्र 'तिप्' प्रत्ययः, 'करिष्य' अङ्गम्[2]। एवम् एव –

फल + इ (प्रथमाबहुवचनप्रत्ययः)

फल + नुम् + इ (नपुंसकस्य झलचः ७.१.७२ इति सूत्रेण नुम् आगमः)

= फल + नु + इ (हलन्त्यम्)

= फल + न् + इ (उपदेशेऽजनुनासिक इत्)

= फलन् + इ ।[3] अत्र इ-प्रत्ययात् पूर्वं वर्तमानः 'फलन्' अङ्गम् ।

आगमः – शब्दस्य[4] आदौ, अन्ते मध्ये वा यः वर्णः योज्यते स आगमः कथ्यते। आगमः मित्रवत्। अयं धातोः प्रत्ययस्य वा हानिं न करोति। तद्यथा –

वि + जि + ल्यप् (समासेऽनञ्पूर्वे क्त्वो ल्यप्)

= वि + जि + ल्य (हलन्त्यम्)

---

[1] आदेशप्रत्यययोः (८. ३. ५९) इति सूत्रेण प्रत्यय-सकारस्य षकारः।

[2] अत्र कृ धातुः, तिप् प्रत्ययः। ततः तिप्-प्रत्यये परे सति स्य-प्रत्ययः। अतः तिप्-प्रत्यये परे सति कृ इति आरभ्य स्यपर्यन्तं 'करिष्य' इति अङ्गम्।

[3] फलान् + इ (सर्वनामस्थाने चासंबुद्धौ ६.४.८ इति सूत्रेण उपधायाः दीर्घः) = फलानि ।

[4] पदस्य, प्रातिपदिकस्य, धातोः प्रत्ययस्य वा।

= वि + जि + य (लशक्वतद्धिते)
= वि + जि + तुक् + य (ह्रस्वस्य पिति कृति तुक्)[1]
= वि + जि + तु + य (हलन्त्यम्)
= वि + जि + त् + य (उपदेशेऽजनुनासिक इत्)
= विजित्य ।

एवम् एव –

अधि + इ + ल्यप् = अधीत्य
उप + इ + ल्यप् = उपेत्य

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

अनुकृत्य, अनुसृत्य, अपहृत्य, अधिकृत्य, आदृत्य, आहृत्य, आश्रित्य, प्रतिश्रुत्य, विस्मृत्य।

अवधेयम्

प्रत्ययस्य, आगमस्य आदेशस्य च प्रयोगात् परं झटित्येव इत्संज्ञक-वर्णानाम् (अनुबन्धानां) लोपः कर्तव्यः। सिद्धान्ततः अनुबन्धरहितस्य एव प्रयोगः क्रियते।

---

[1] हस्वस्य पिति कृति तुक् ॥ ६. १. ७१ ॥ विधिसूत्रम्।

हस्वान्त-धातोः परं तुक् आगमः भवति यदि कृत्संज्ञकः पित् (प् + इत्) परतः स्यात्।

धातोः (३. १. ९१) इत्यधिकारे विधीयमानः तिङ्भिन्नः प्रत्ययः कृत्संज्ञकः। अत्र जि-धातोः परं ल्यप्-प्रत्ययः प्रयुक्तः। सः कृत्संज्ञकः। अस्य पकारः हलन्त्यम् इति सूत्रेण इत्संज्ञायां लुप्यते। अतः ल्यप् पित्-प्रत्ययः (पकारलोपि-प्रत्ययः)। कृत्संज्ञकस्य पकारलोपि-ल्यप्प्रत्ययस्य योगेन ह्रस्वान्तात् जि-धातोः परं तुक् आगमः जातः।

ल्यप्

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ७. १. ३७ ॥ विधिसूत्रम्।

समासे अनञ्पूर्वे क्त्वः ल्यप् स्यात्।

अनञ्पूर्वे समासे (नञ्भिन्नसमासे) क्त्वा-प्रत्ययस्य स्थाने ल्यप् आदेशः भवति। तद्यथा –

अभि + लष् + क्त्वा[1] (समानकर्तृकयोः पूर्वकाले)
अभि + लष् +ल्यप् (समासेऽनञ्पूर्वे क्त्वो ल्यप्)
= अभि + लष् + ल्य (हलन्त्यम्)
= अभि + लष् + य (लशक्वतद्धिते)
= अभिलष्य । एवम् एव –

अति+क्रम्+ल्यप्=अतिक्रम्य	आ+क्रुश्+ल्यप्=आक्रुश्य
अप+कृष्+ल्यप्=अपकृष्य	आ+गम्+ल्यप्=आगम्य
अव+गाह्+ल्यप्=अवगाह्य	आ+चम्+ल्यप्=आचम्य
अव+बुध्+ल्यप्=अवबुध्य	आ+दिश्+ल्यप्+आदिश्य
अव+रुह्+ल्यप्=अवरुह्य	आ+मन्त्र्+ल्यप्=आमन्त्र्य
अव+लम्ब्+ल्यप्=अवलम्ब्य	आ+रभ्+ल्यप्=आरभ्य
अव+लोक्+ल्यप्=अवलोक्य	आ+रुह्+ल्यप्=आरुह्य
आ+कर्ण्+ल्यप्=आकर्ण्य	आ+लक्ष्+ल्यप्=आलक्ष्य
आ+काङ्क्ष्+ल्यप्=आकाङ्क्ष्य	आ+लिख्+ल्यप्=आलिख्य
आ+कृष्+ल्यप्=आकृष्य	आ+शङ्क्+ल्यप्=आशङ्क्य

---

[1] अत्र क्त्वा कृत्प्रत्ययः, लष्+त्वा इति कृदन्तम्। कुगतिप्रादयः (२. २. १८) इति सूत्रेण अभि इत्यस्य लष्+त्वा इत्यनेन समासः।

उद्+दिश्+ल्यप्=उद्दिश्य
उप+अर्ज्+ल्यप्=उपार्ज्य
उप+विश्+ल्यप्=उपविश्य
नि+गद्+ल्यप्=निगद्य
नि+पत्+ल्यप्=निपत्य
नि+पीड्+ल्यप्=निपीड्य
नि+मील्+ल्यप्=निमील्य
नि+युज्+ल्यप्=नियुज्य
परि+अट्+ल्यप्=पर्यट्य
परि+चर्+ल्यप्+परिचर्य
परि+त्यज्+ल्यप्=परित्यज्य
प्र+ईक्ष्+ल्यप्=प्रेक्ष्य
प्र+कम्प्+ल्यप्=प्रकम्प्य
प्र+काश्+ल्यप्=प्रकाश्य
प्र+बुध्+ल्यप्=प्रबुध्य
प्र+मुद्+ल्यप्=प्रमुद्य
प्र+यत्+ल्यप्=प्रयत्य
प्र+विश्+ल्यप्=प्रविश्य
प्र+सह्+ल्यप्=प्रसह्य
प्र+हृष्+ल्यप्=प्रहृष्य
वि+ईक्ष्+ल्यप्=वीक्ष्य
वि+गर्ह्+ल्यप्=विगर्ह्य
वि+चिन्त्+ल्यप्=विचिन्त्य
वि+द्विष्+ल्यप्=विद्विष्य
वि+नश्+ल्यप्=विनश्य
वि+निन्द्+ल्यप्=विनिन्द्य
वि+भज्+ल्यप्=विभज्य
वि+मुच्+ल्यप्=विमुच्य
वि+मृश्+ल्यप्=विमृश्य
वि+दम्+ल्यप्=विदम्य
वि+रुध्+ल्यप्=विरुध्य
वि+युज्+ल्यप्=वियुज्य
वि+लिख्+ल्यप्=विलिख्य
वि+लुप्+ल्यप्=विलुप्य
वि+श्रम्+ल्यप्=विश्रम्य
वि+सृज्+ल्यप्=विसृज्य
वि+हस्+ल्यप्=विहस्य
सम्+आप्+ल्यप्=समाप्य
सम्+पूज्+ल्यप्=सम्पूज्य
सम्+मिल्+ल्यप्=सम्मिल्य
सम्+क्षिप्+ल्यप्=संक्षिप्य
सम्+यम्+ल्यप्=संयम्य
सम्+रक्ष्+ल्यप्=संरक्ष्य
सम्+सूच्+ल्यप्=संसूच्य
सम्+सेव्+ल्यप्=संसेव्य
सम्+स्पृश्+ल्यप्=संस्पृश्य

ल्यप्

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ७. १. ३७ ॥ विधिसूत्रम्।

समासे अनञ्पूर्वे क्त्वः ल्यप् स्यात्।

अनञ्पूर्वे समासे (नञ्भिन्नसमासे) क्त्वा-प्रत्ययस्य स्थाने ल्यप् आदेशः भवति। तद्यथा –

अभि + लष् + क्त्वा[1] (समानकर्तृकयोः पूर्वकाले)
अभि + लष् +ल्यप् (समासेऽनञ्पूर्वे क्त्वो ल्यप्)
= अभि + लष् + ल्य (हलन्त्यम्)
= अभि + लष् + य (लशक्वतद्धिते)
= अभिलष्य । एवम् एव –

अति+क्रम्+ल्यप्=अतिक्रम्य	आ+क्रुश्+ल्यप्=आक्रुश्य
अप+कृष्+ल्यप्=अपकृष्य	आ+गम्+ल्यप्=आगम्य
अव+गाह्+ल्यप्=अवगाह्य	आ+चम्+ल्यप्=आचम्य
अव+बुध्+ल्यप्=अवबुध्य	आ+दिश्+ल्यप्+आदिश्य
अव+रुह्+ल्यप्=अवरुह्य	आ+मन्त्र्+ल्यप्=आमन्त्र्य
अव+लम्ब्+ल्यप्=अवलम्ब्य	आ+रभ्+ल्यप्=आरभ्य
अव+लोक्+ल्यप्=अवलोक्य	आ+रुह्+ल्यप्=आरुह्य
आ+कर्ण्+ल्यप्=आकर्ण्य	आ+लक्ष्+ल्यप्=आलक्ष्य
आ+काङ्क्ष्+ल्यप्=आकाङ्क्ष्य	आ+लिख्+ल्यप्=आलिख्य
आ+कृष्+ल्यप्=आकृष्य	आ+शङ्क्+ल्यप्=आशङ्क्य

---

[1] अत्र क्त्वा कृत्प्रत्ययः, लष्+त्वा इति कृदन्तम्। कुगतिप्रादयः (२. २. १८) इति सूत्रेण अभि इत्यस्य लष्+त्वा इत्यनेन समासः।

उद्+दिश्+ल्यप्=उद्दिश्य
उप+अर्ज्+ल्यप्=उपार्ज्य
उप+विश्+ल्यप्=उपविश्य
नि+गद्+ल्यप्=निगद्य
नि+पत्+ल्यप्=निपत्य
नि+पीड्+ल्यप्=निपीड्य
नि+मील्+ल्यप्=निमील्य
नि+युज्+ल्यप्=नियुज्य
परि+अट्+ल्यप्=पर्यट्य
परि+चर्+ल्यप्+परिचर्य
परि+त्यज्+ल्यप्=परित्यज्य
प्र+ईक्ष्+ल्यप्=प्रेक्ष्य
प्र+कम्प्+ल्यप्=प्रकम्प्य
प्र+काश्+ल्यप्=प्रकाश्य
प्र+बुध्+ल्यप्=प्रबुध्य
प्र+मुद्+ल्यप्=प्रमुद्य
प्र+यत्+ल्यप्=प्रयत्य
प्र+विश्+ल्यप्=प्रविश्य
प्र+सह्+ल्यप्=प्रसह्य
प्र+हृष्+ल्यप्=प्रहृष्य
वि+ईक्ष्+ल्यप्=वीक्ष्य
वि+गर्ह्+ल्यप्=विगर्ह्य
वि+चिन्त्+ल्यप्=विचिन्त्य
वि+द्विष्+ल्यप्=विद्विष्य
वि+नश्+ल्यप्=विनश्य
वि+निन्द्+ल्यप्=विनिन्द्य
वि+भज्+ल्यप्=विभज्य
वि+मुच्+ल्यप्=विमुच्य
वि+मृश्+ल्यप्=विमृश्य
वि+दम्+ल्यप्=विदम्य
वि+रुध्+ल्यप्=विरुध्य
वि+युज्+ल्यप्=वियुज्य
वि+लिख्+ल्यप्=विलिख्य
वि+लुप्+ल्यप्=विलुप्य
वि+श्रम्+ल्यप्=विश्रम्य
वि+सृज्+ल्यप्=विसृज्य
वि+हस्+ल्यप्=विहस्य
सम्+आप्+ल्यप्=समाप्य
सम्+पूज्+ल्यप्=सम्पूज्य
सम्+मिल्+ल्यप्=सम्मिल्य
सम्+क्षिप्+ल्यप्=संक्षिप्य
सम्+यम्+ल्यप्=संयम्य
सम्+रक्ष्+ल्यप्=संरक्ष्य
सम्+सूच्+ल्यप्=संसूच्य
सम्+सेव्+ल्यप्=संसेव्य
सम्+स्पृश्+ल्यप्=संस्पृश्य

अनञ् इति किम् ?

उत्तरम् – नञ्समासे क्त्वा-प्रत्ययस्य ल्यप् न भवति। तद्यथा – न + कृत्वा = अकृत्वा । न + गत्वा = अगत्वा । अत्र अकृत्वा, अगत्वा इति समस्तं पदम्। नञ् इत्यनेन न इति अव्ययं गृह्यते। नलोपो नञः (६. ३. ७३) इति सूत्रेण न इत्यस्य न् लुप्यते, अ अवशिष्यते।

अनीयर्

अनीयर्-प्रत्ययः सर्वेभ्यः धातुभ्यः भवति। अनीयर्-प्रत्ययस्य अनीय अवशिष्यते। तद्यथा –

अर्ज् + अनीयर्[1]
= अर्ज् + अनीय (हलन्त्यम्)
= अर्जनीय। एवम् एव –
आ + चर् + अनीयर् = आचरणीय
प्र + अर्थ् + अनीयर् = प्रार्थनीय
प्र + आप् + अनीयर् = प्रापणीय
प्र + काश् + अनीयर् = प्रकाशनीय
प्र + शंस् + अनीयर् = प्रशंसनीय

अधोलिखित-शब्दानां धातुं प्रत्ययं च दर्शय –

कथनीय, क्रीडनीय, क्षमणीय, खण्डनीय, खादनीय, खेलनीय, गणनीय, ग्रहणीय, चिन्तनीय, दण्डनीय, धावनीय, निन्दनीय, पठनीय,

---

[1] अनीयर्-प्रत्ययान्तः शब्दः विशेषणम् । अयं विशेष्यस्य लिङ्गं वचनं च अनुसरति । तद्यथा – ज्ञानम् अर्जनीयम् । विद्या अर्जनीया । अनुभवः अर्जनीयः ।

पानीय, पालनीय, पूजनीय, भाषणीय, भ्रमणीय, मिश्रणीय, रक्षणीय, रचनीय, रमणीय, वन्दनीय, शिक्षणीय, सहनीय, साधनीय, सेवनीय, हसनीय।

गुणः – इ-स्थाने ए । तद्यथा –

लिख् + अनीयर्
= लिख् + अनीय (हलन्त्यम्)
= ल् + इ + ख् + अनीय
= ल् + ए + ख् + अनीय (पुगन्तलघूपधस्य च)
= लेखनीय । एवम् एव –
क्षिप् + अनीयर् = क्षेपणीय ।

अधोलिखित-शब्दानां धातुं प्रत्ययं च दर्शय –

छेदनीय, भेदनीय, पेषणीय, लेपनीय, श्लेषणीय, सेचनीय।

गुणः – उ-स्थाने ओ । तद्यथा –

गुप् + अनीयर्
= गुप् + अनीय (हलन्त्यम्)
= ग् + उ + प् + अनीय
= ग् + ओ + प् + अनीय (पुगन्तलघूपधस्य च)
= गोपनीय । एवम् एव –
आ + रुह् + अनीयर् = आरोहणीय
सम् + शुध् + अनीयर् = संशोधनीय

अधोलिखित-शब्दानां धातुं प्रत्ययं च दर्शय –

भोजनीय, योजनीय, रोधनीय, लोभनीय, शोचनीय, शोभनीय।

गुणः – ऋ-स्थाने अर् । तद्यथा –

दृश् + अनीयर्
= दृश् + अनीय (हलन्त्यम्)
= द् + ऋ + श् + अनीय
= द्+अर्+श्+अनीय (पुगन्तलघूपधस्य च, उरण् रपरः)
= दर्शनीय । एवम् एव –
वृज् + अनीयर् = वर्जनीय
अनु + कृ +अनीयर् = अनुकरणीय (सार्वधातुकार्धधातुकयोः[1])

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –
अनुसरणीय, आकर्षणीय, वरणीय, स्मरणीय।

तिङ् शित् सार्वधातुकम् ॥ ३. ४. ११३ ॥ संज्ञासूत्रम् ।

अनुवृत्तिः – धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)।
अर्थः – धातोः (३. १. ९१) इति अधिकारसूत्रात् परं विहिताः तिङः शितश्च प्रत्ययाः सार्वधातुकसंज्ञकाः भवन्ति। तद्यथा –

तिङ् इति एकः प्रत्याहारः। तिप् इत्यस्य ति-शब्दात् आरभ्य महिङ् इत्यस्य ङकारपर्यन्तं तिङ्प्रत्याहारः। तद्यथा, तिङ् – तिप् तस् झि,

---

[1] **सार्वधातुकार्धधातुकयोः ॥ ७. ३. ८४ ॥ विधिसूत्रम्।**

अनुवृत्तिः – गुणः (७. ३. ८२), अङ्गस्य (६. ४. १) इकः । अर्थः – यदि सार्वधातुकः आर्धधातुकः च प्रत्ययः परतः अस्ति तर्हि इगन्तस्य (इक् + अन्तस्य) अङ्गस्य गुणः भवति। तिङ् शित् सार्वधातुकम्, आर्धधातुकं शेषः इति सूत्रानुसारेण अनीयर् आर्धधातुक-प्रत्ययः। *अजन्तधातूनां 'सार्वधातुकार्धधातुकयोः', हलन्तधातूनां 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणः भवति।*

सिप् थस् थ, मिप् वस् मस् (परस्मैपदम्), त आताम् झ, थास् आथाम् ध्वम्, इट् वहिमहिङ (आत्मनेपदम्) ३. ४. ७८ । एते सार्वधातुक-प्रत्ययाः कथ्यन्ते।

शित्(श्+इत्)प्रत्ययाः अपि सार्वधातुकाः। उदाहरणतः, शतृ, शानच् इति एतौ सार्वधातुकप्रत्ययौ। एतयोः शकारः इत्संज्ञकः।

शतृ-प्रत्ययः परस्मैपदि-धातुभ्यः भवति। तद्यथा –

पठ् + शप् + शतृ (लटः शतृशानचावप्रथमासमानाधिकरणे ३.२.१२४)
= पठ् + शप् + शत् (उपदेशेऽजनुनासिक इत्)
= पठ् + श + शत् (हलन्त्यम्)
= पठ् + श् + अ + श् + अत्
= पठ् + अ + अत् (लशक्वतद्धिते)
= पठ् + अत् (अतो गुणे)
= पठत् ।

	एकवचनम्	*द्विवचनम्*	*बहुवचनम्*
(नपुंसके)	पठत्	पठन्ती	पठन्ति
(पुंलिङ्गे)	पठन्	पठन्तौ	पठन्तः
(स्त्रीलिङ्गे)	पठन्ती	पठन्त्यौ	पठन्त्यः

शानच्-प्रत्ययः आत्मनेपदि-धातुभ्यः भवति। तद्यथा –

वन्द् + शप् + शानच् (लटः शतृशानचा०)
= वन्द् + श + शान (हलन्त्यम्)
= वन्द् + श् + अ + श् + आन
= वन्द् + अ + आन (लशक्वतद्धिते)
= वन्द + आन

= वन्द + मुक् + आन (आने मुक्)[1]
= वन्द + म् + आन (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= वन्दमान ।

आर्धधातुकं शेषः ॥ ३. ४. ११४ ॥ संज्ञासूत्रम् ।

अनुवृत्तिः – धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – धातोः विहितः शेषः (तिङशिद्भिन्नः प्रत्ययः) आर्धधातुकम्। तिङ-शित्-प्रत्ययान् वर्जयित्वा अन्ये सार्वधातुकभिन्नाः प्रत्ययाः आर्धधातुकसंज्ञकाः भवन्ति।

लिट् च (३. ४. ११५), लिङाशिषि (३. ४. ११६)। लिट्लकारस्य आशीर्लिङ्लकारस्य च विधीयमानः तिङप्रत्ययः आर्धधातुकसंज्ञकः।

अच्

अच्-प्रत्ययान्तः शब्दः पुंलिङ्गः। 'अज्विधिः सर्वधातुभ्यः' इति काशिका-वृत्तिकारस्य कथनेन अयं प्रत्ययः सर्वधातुभ्यः सम्भवति। अच्-प्रत्ययस्य अ अवशिष्यते। तद्यथा –

अङ्क् + अच्
= अङ्क् + अ (हलन्त्यम्)
= अङ्क । एवम् एव –
आ + भास् + अच् = आभास
परि + मल् + अच् = परिमल

---

[1] आने मुक् ॥ ७. २. ८२ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अतः (७. २. ८०), अङ्गस्य (६. ४. १)। अर्थः – यदि आन परतः अस्ति तर्हि अङ्गस्य अतः (अकारस्य) मुक् आगमः भवति।

वि + रह् + अच् = विरह

सम् + ईर् + अच् = समीर

अधोलिखित-शब्दानां धातुं प्रत्ययं च दर्शय –

अक्ष, अंश, कट, कण, कण्ठ, गण, गण्ड, गद, गन्ध, गल, गुण, ग्रह, घट, घण्ट, जप, ज्वर, तर्क, तीर, दीप, धूप, नद, नल, पक्ष, फण, मद, मोक्ष, रस, वट, वश, व्रण, शुण्ड, श्लोक, स्तन, स्तम्भ, स्वर, हठ।

एरच् ॥ ३. ३. ५६ ॥ विधिसूत्रम् ।

एः + अच् । अनुवृत्तिः – अकर्तरि च कारके संज्ञायाम् (३. ३. १९), भावे (३. ३. १८), धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – इ-वर्णान्तात् धातोः भावे अकर्तरि च कारके संज्ञायाम् अच् प्रत्ययः भवति। इ-वर्णान्त-धातुभ्यः अच्-प्रत्ययः भवति। अयम् अच्-प्रत्ययः घञ्-प्रत्ययस्य अपवादः। अच्-प्रत्ययस्य अ अवशिष्यते। तद्यथा –

अनु + इ + अच्
= अनु + इ + अ (हलन्त्यम्)
= अनु + ए + अ (सार्वधातुकार्धधातुकयोः)
= अनु + अय् + अ (एचोऽयवायावः)
= अन् + उ + अय् + अ
= अन् + व् + अय् + अ (इको यणचि)
= अन्वय ।

एवम् एव –

आ + इ + अच् = आय

वि + परि + इ + अच् = विपर्यय

क्री + अच् = क्रय

क्षि + अच् = क्षय

सम् + उद् + चि + अच् = समुच्चय

जि + अच् = जय

निर् + नी + अच् = निर्णय

आ + ली + अच् = आलय

सम् + शी + अच् = संशय

आ + श्रि + अच् = आश्रय

वि + स्मि + अच् = विस्मय

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

उदय, व्यय, समय, समन्वय, समवाय, सञ्चय, विजय, अभिनय, प्रणय, निलय, प्रलय, अतिशय, आशय, प्रश्रय।

अप्

ऋदोरप् ॥ ३. ३. ५७ ॥ विधिसूत्रम् ।

ऋदोः + अप् । ऋदोः – ऋत् च उः च ऋदुः, तस्मात्।

अनुवृत्तिः – अकर्तरि च कारके संज्ञायाम् (३. ३. १९), भावे (३. ३. १८), धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – ऋकारान्तेभ्यः उ-वर्णान्तेभ्यः च धातुभ्यः कर्तृवर्जिते कारके संज्ञायां विषये भावे च अप् प्रत्ययः भवति। अयं घञ्-प्रत्ययस्य अपवादः। अप्-प्रत्ययान्तः शब्दः पुंलिङ्गः।

ऋकारान्तेभ्यः उ-वर्णान्तेभ्यः च धातुभ्यः अप्-प्रत्ययः भवति। अप्-प्रत्ययस्य अ अवशिष्यते। तद्यथा –

ऋ-ऊ-वर्णान्त → अप्

(अ) ऋकारान्त-धातुभ्यः

कृ + अप्
= कृ + अ (हलन्त्यम्)
= क् + ऋ + अ
= क् + अर् + अ (सार्वधातुकार्धधातुकयोः, उरण् रपरः)
= कर ।

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

अवकर, आकर, निकर, आदर, वर, शर ।

(आ) उवर्णान्त-धातुभ्यः

यु + अप्
= यु + अ (हलन्त्यम्)
= य् + उ + अ
= य् + ओ + अ (सार्वधातुकार्धधातुकयोः)
= य् + अव् + अ (एचोऽयवायावः)
= यव । एवम् एव –

द्रु + अप् = द्रव
प्लु + अप् = प्लव
रु + अप् = रव
स्तु + अप् = स्तव
लू + अप् = लव
उद् + भू + अप् = उद्भव
उद् + सू + अप् = उत्सव

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

विप्लव, अनुभव, पराभव, सम्भव, प्रसव ।

ग्रहवृदृनिश्चिगमश्च ॥ ३. ३. ५८ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अप् (३. ३. ५७), अकर्तरि च कारके संज्ञायाम् (३. ३. १९), भावे (३. ३. १८), धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – ग्रह, वृ, दृ, निर्+चि, गम् इति एभ्यः धातुभ्यः कर्तृवर्जिते कारके संज्ञायां विषये भावे च अप् प्रत्ययः भवति। अप्-प्रत्ययस्य अ अवशिष्यते। तद्यथा –

ग्रह् + अप्
= ग्रह् + अ (हलन्त्यम्)
= ग्रह ।

एवम् एव –

सम् + ग्रह् + अप् = सङ्ग्रह
उद् + गम् + अप् = उद्गम

वृ + अप्
= वृ + अ (हलन्त्यम्)
= व् + ऋ +अ
= व् + अर् + अ (सार्वधातुकार्धधातुकयोः, उरण् रपरः)
= वर । एवम् एव – दृ + अप् = दर

निर् + चि + अप्
= निर् + चि +अ (हलन्त्यम्)
= निर् + च् + इ + अ
= निर् + च् + ए + अ (सार्वधातुकार्धधातुकयोः)
= निर् + च् + अय् + अ (एचोऽयवायावः)
= निः + च् + अय् + अ (खरवसानयोर्विसर्जनीयः)
= निस् + च् + अय् + अ (विसर्जनीयस्य सः)

= निश् + च् + अय् + अ (स्तोः श्चुना श्चुः)

= निश्चय ।

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

कर्ण, जप, नियम, निस्वन, पण, यम, रण, वश, सङ्गम, संयम।

ल्युट्

अयं प्रत्ययः सर्वेभ्यः धातुभ्यः भवति । ल्युट्-प्रत्ययान्त-शब्दः नपुंसक-लिङ्गः । ल्युट्-प्रत्ययस्य यु अवशिष्यते, तस्य अन इति आदेशः भवति। तद्यथा –

अर्ज् + ल्युट्

= अर्ज् + ल्यु (हलन्त्यम्)

= अर्ज् + यु (लशक्वतद्धिते)

= अर्ज् + अन (युवोरनाकौ)[1]

= अर्जन । एवम् एव –

आस् + ल्युट् = आसन

परि + अट् + ल्युट् = पर्यटन

प्र + आप् + ल्युट् = प्रापण[2]

परि + ईक्ष् + ल्युट् = परीक्षण

प्र +काश् + ल्युट् = प्रकाशन

---

[1] युवोरनाकौ ॥ ७. १. १ ॥ विधिसूत्रम् ।

युवोः + अन + अकौ । अनुवृत्तिः – अङ्गस्य (६. ४. १) । यु, वु इति अङ्ग-सम्बन्धिनोः अनयोः स्थाने क्रमेण अन, अक इति आदेशौ भवतः। यु इति अस्य स्थाने अन, वु इति अस्य स्थाने अक आदेशः भवति।

[2] अट्कुप्वाङ० इति सूत्रेण नकारस्य णकारः।

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

आक्रमण, आख्यान, कथन, कम्पन, कूजन, कूर्दन, क्रन्दन, क्रीडन, खण्डन, गमन, गर्जन, गुञ्जन, ग्रहण, चर्वण, चलन, चिन्तन, जल्पन, जीवन, ज्ञान, ज्वलन, तर्जन, दमन, दलन, दंशन, दहन, दान, धावन, पठन, पतन, पान, पालन, पीडन, पूजन, बन्धन, भक्षण, भजन, भाषण, भूषण, भ्रमण, मनन, मन्थन, मिश्रण, यान, रक्षण, लुण्ठन, वचन, वञ्चन, वदन, वमन, वसन, व्याख्यान, शासन, शिक्षण, सदन, सहन, साधन, स्खलन, स्थान, स्नान, स्पन्दन ।

गै + ल्युट्
= गा + ल्युट् (आदेच उपदेशेऽशिति)[1]
= गा + ल्यु (हलन्त्यम्)
= गा + यु (लशक्वतद्धिते)
= गा + अन (युवोरनाकौ)
= गान ।

एवम् एव –

त्रै + ल्युट् = त्राण
ध्यै +ल्युट् = ध्यान
म्लै + ल्युट् = म्लान
आ + ह्वे + ल्युट् = आह्वान

---

[1] आदेच उपदेशेऽशिति ॥ ६. १. ४५ ॥ विधिसूत्रम् ।

आत्+एचः उपदेशे अशिति। अर्थः – यदि शित्(श्+इत्)प्रत्ययः परतः नास्ति तर्हि उपदेशे एजन्त-धातोः एचः स्थाने आकारादेशः भवति। अयम् आकारः प्रत्ययोत्पत्तेः पूर्वमेव भवति।

गुणः – इ-स्थाने ए । तद्यथा –

इ + ल्युट्
= इ + ल्यु (हलन्त्यम्)
= इ + यु (लशक्वतद्धिते)
= इ + अन (युवोरनाकौ)
= ए + अन (सार्वधातुकार्धधातुकयोः)
= अय् + अन (एचोऽयवायावः)
= अयन । एवम् एव –
अधि + इ + ल्युट् = अध्ययन

अधोलिखित-शब्दानां धातुं प्रत्ययं च दर्शय –

क्षेपण, छेदन, भेदन, पेषण, लेखन, लेपन, श्लेषण, सेचन।

अत्र 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणः कर्तव्यः।

नी + ल्युट्
= नी + ल्यु (हलन्त्यम्)
= नी + यु (लशक्वतद्धिते)
= नी + अन (युवोरनाकौ)
= न् + ई + अन
= न् + ए + अन (सार्वधातुकार्धधातुकयोः)
= न् + अय् + अन (एचोऽयवायावः)
= नयन ।

एवम् एव –
क्री + ल्युट् = क्रयण
डी + ल्युट् = डयन
शी + ल्युट् = शयन

गुणः – उ-स्थाने ओ । तद्यथा –

गुप् + ल्युट्
= गुप् + ल्यु (हलन्त्यम्)
= गुप् + यु (लशक्वतद्धिते)
= गुप् + अन (युवोरनाकौ)
= ग् + उ + प् + अन
= ग् + ओ + प् + अन (पुगन्तलघूपधस्य च)
= गोपन । एवम् एव –
तुष् + ल्युट् = तोषण[1]
पुष् +ल्युट् = पोषण
भुज् + ल्युट् = भोजन
आ + रुह् + ल्युट् = आरोहण
शुभ् + ल्युट् = शोभन
शुष् + ल्युट् = शोषण
भू + ल्युट्
= भू + ल्यु (हलन्त्यम्)
= भू + यु (लशक्वतद्धिते)
= भू + अन (युवोरनाकौ)
= भ् + ऊ + अन
= भ् + ओ + अन (सार्वधातुकार्धधातुकयोः)
= भ् + अव् + अन (एचोऽयवायावः)
= भवन ।

---

[1] 'रषाभ्यां नो णः समानपदे, अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रानुसारेण नकारस्य णकारः।

गुणः – ऋ-स्थाने अर् । तद्यथा –

दृश् + ल्युट्
= दृश् + ल्यु (हलन्त्यम्)
= दृश् + यु (लशक्वतद्धिते)
= दृश् + अन (युवोरनाकौ)
= द् + ऋ + श् + अन
= द्+अर् +श्+अन (पुगन्तलघूपधस्य च, उरण् रपरः)
= दर्शन । एवम् एव –

नृत् + ल्युट् = नर्तन। मृद् + ल्युट् = मर्दन। वृज् + ल्युट् = वर्जन।

अधोलिखित-शब्दानाम् उपसर्गम्, धातुं प्रत्ययं च दर्शय –

अनुकरण, अनुसरण, आकर्षण, कर्तन, घर्षण, जागरण, तर्पण, धरण, मरण, सर्जन, स्मरण, हरण।

स्वरसन्धिः

दीर्घसन्धिः

अकः सवर्णे दीर्घः ॥ ६. १. १०१ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अचि (६. १. ७७), एकः पूर्वपरयोः (६. १. ८४), संहितायाम् (६. १. ७२)। अर्थः – अकः सवर्णे अचि परतः पूर्वपरयोः स्थाने दीर्घः एकादेशः भवति। यदि अक् (अ, इ, उ, ऋ, ऌ) इति अस्मात् परं समानम् अक्षरं स्यात् तर्हि तयोः स्थाने समानाक्षरस्य दीर्घम् अक्षरं भवति। तद्यथा –

(क) *अ/आ + अ/आ = आ*
न + अस्ति = नास्ति

(ख) *इ/ई + इ/ई = ई*
अति + इव = अतीव

नील + आकाश = नीलाकाश
विद्या + अभ्यास = विद्याभ्यास
विद्या + आलय = विद्यालय

गिरि + ईश = गिरीश
सुधी + इन्द्र = सुधीन्द्र
लक्ष्मी + ईश = लक्ष्मीश

(ग) *उ/ऊ + उ/ऊ = ऊ*
गुरु + उपदेश = गुरूपदेश

(घ) *ऋ/ॠ + ऋ/ॠ = ॠ*
पितृ + ऋण = पितॄण

गुणसन्धिः

आद् गुणः ॥ ६. १. ८७ ॥ विधिसूत्रम्।

अनुवृत्तिः – अचि (६. १. ७७), एकः पूर्वपरयोः (६. १. ८४), संहितायाम् (६. १. ७२)। अर्थः – अ-वर्णात् परं यदि कोऽपि स्वरवर्णः अस्ति तर्हि तयोः स्थाने एकः गुणादेशः भवति।[1] तद्यथा –

(क) *अ/आ + इ/ई = ए*
देव + इन्द्र = देवेन्द्र
यज्ञ + ईश्वर = यज्ञेश्वर
सा + इयम् = सेयम्
रमा + ईश = रमेश

(ख) *अ/आ + उ/ऊ = ओ*
पर + उपकार = परोपकार
एक + ऊन = एकोन
महा + उत्सव = महोत्सव
महा + ऊर्मि = महोर्मि

(ग) *अ/आ + ऋ = अर्*
देव + ऋषि = देवर्षि

(घ) *अ + ऌ = अल्*
तव + ऌकार = तवल्कार

---

[1] यद्यपि अवर्णात् अचि परे गुणः विहितः, तथापि अवर्णात् इ-उ-ऋ-ऌ-वर्णेषु परेषु एव गुणः भवति। अकः सवर्णे दीर्घः, वृद्धिरेचि इति गुणस्य अपवादौ। तेन अवर्णात् अवर्णे परे सवर्णदीर्घः, अवर्णात् एचि परे वृद्धिः भवति।

वृद्धिसन्धिः

वृद्धिरेचि ॥ ६. १. ८८ ॥ विधिसूत्रम्।

वृद्धिः + एचि । अनुवृत्तिः – आत् (६. १. ८७), एकः पूर्वपरयोः (६. १. ८४), संहितायाम् (६. १. ७२) । अर्थः – आत् एचि परे संहितायां पूर्वपरयोः वृद्धिः एकादेशः भवति। अ-वर्णात् परं यदि एच् (ए, ओ, ऐ, औ) अस्ति तर्हि तयोः स्थाने वृद्धिः एकादेशः भवति । तद्यथा –

(क) अ/आ + ए/ऐ = ऐ	(ख) अ/आ + ओ/औ = औ
अद्य + एव = अद्यैव	तव + ओष्ठ = तवौष्ठ
सदा + एव = सदैव	महा + ओषधि = महौषधि
दिव्य + ऐश्वर्य = दिव्यैश्वर्य	दिव्य + औषध =दिव्यौषध
महा + ऐश्वर्य = महैश्वर्य	महा + औषध =महौषध

'वृद्धिरेचि' इति सूत्रम् 'आद् गुणः' इत्यस्य सूत्रस्य अपवादः[1] ।

---

[1] अपवादः – यस्य सूत्रस्य लक्ष्यम् अन्यसूत्रस्य लक्ष्ये अन्तर्भवति तत् तस्य सूत्रस्य अपवादः। तद्यथा – 'वृद्धिरेचि' इत्यस्य सूत्रस्य लक्ष्यम् अ + एच्, 'आद् गुणः' इत्यस्य सूत्रस्य लक्ष्यम् अ + अच्। अत्र वृद्धिरेचि इत्यस्य सूत्रस्य एच् आद् गुणः इत्यस्य सूत्रस्य अचि अन्तर्भवति। अतः वृद्धिरेचि इति सूत्रम् आद् गुणः इत्यस्य सूत्रस्य अपवादः। तस्मात् अद्य + एव इत्यत्र यद्यपि आद् गुणः इत्यस्य सूत्रस्य प्राप्तिः अस्ति तथापि तत् सूत्रं न प्रवर्तते। वृद्धिरेचि इति सूत्रमेव प्रवर्तते। एवम् एव, सवर्णदीर्घः (अ+अ=आ) आद्गुणस्य अपवादः, सवर्णदीर्घः (इ+इ=ई) इको यणचि इत्यस्य अपवादः, पूर्वरूपम् (वने+अत्र=वनेऽत्र) एचोऽयवायावः इत्यस्य अपवादः।

यण्सन्धिः

इको यणचि ॥ ६. १. ७७ ॥ विधिसूत्रम्।

इकः यण् + अचि। अनुवृत्तिः – संहितायाम् (६. १. ७२)। अर्थः – इकः (इ उ ऋ ऌ) स्थाने यण् (य् व् र् ल्) आदेशः भवति अचि परतः। यदि स्वरवर्णः परतः अस्ति तर्हि इ, उ, ऋ, ऌ इति एषां स्थाने क्रमेण य्, व्, र्, ल् इति आदेशाः भवन्ति। अतः इ-स्थाने य्, उ-स्थाने व्, ऋ-स्थाने र्, ऌ-स्थाने ल् इति आदेशः भवति। तद्यथा –

यदि + अपि
= यद् + इ + अपि
= यद् + य् + अपि
= यद्यपि ।

एवम् एव –

अति + आचार = अत्याचार
प्रति + उपकार = प्रत्युपकार
सु +आगतम्
= स् + उ + आगतम्
= स् + व् + आगतम्
= स्वागतम् ।

एवम् एव –

सु + अस्ति = स्वस्ति
अनु + एषण = अन्वेषण
पितृ + आदेश
= पित् + ऋ + आदेश

= पित् + र् + आदेश

= पित्रादेश ।

एवम् एव –

मातृ + अनुमति = मात्रनुमति

मातृ + इच्छा = मात्रिच्छा

दातृ + उपदेश = दात्रुपदेश

अवधेयम्

इ/ई + इ/ई = ई (अकः सवर्णे दीर्घः)। तद्यथा –

मुनि + इन्द्र = मुनीन्द्र । कवि + ईश्वर = कवीश्वर

उ/ऊ + उ/ऊ = ऊ (अकः सवर्णे दीर्घः) । तद्यथा –

सु + उक्ति = सूक्ति । रघु + उत्तम = रघूत्तम ।

ऋ + ऋ = ॠ (अकः सवर्णे दीर्घः) तद्यथा–

पितृ + ऋण = पितॄण । मातृ + ऋण = मातॄण ।

अयादि-चतुष्टयम्

एचोऽयवायावः ॥ ६. १. ७८ ॥ विधिसूत्रम्।

एचः + अय् + अव् + आय् + आवः। अनुवृत्तिः – अचि (६. १. ७७), संहितायाम् (६. १. ७२)। अर्थः – अचि परतः एचः (ए ओ ऐ औ) स्थाने अय्, अव्, आय्, आव् इति एते आदेशाः क्रमेण भवन्ति। यदि स्वरवर्णः परतः अस्ति तर्हि ए, ओ, ऐ, औ इति एषां स्थाने क्रमेण अय्, अव्, आय्, आव् इति आदेशाः भवन्ति। अतः ए-स्थाने अय्,

ओ-स्थाने अव्, ऐ-स्थाने आय्, औ-स्थाने आव् इति आदेशः भवति। तद्यथा –

(क) *ए-स्थाने अय्*

ये + एते
= य् + ए + एते
= य् + अय् + एते
= ययेते ।

(ख) *ऐ-स्थाने आय्*

कस्मै + अर्पयसि
= कस्म् + ऐ + अर्पयसि
= कस्म् + आय् + अर्पयसि
= कस्मायर्पयसि ।

(ग) *ओ-स्थाने अव्*

बन्धो + आगच्छ
= बन्ध् + ओ + आगच्छ
= बन्ध् + अव् + आगच्छ
= बन्धवागच्छ ।

(घ) *औ-स्थाने आव्*

उभौ + अपि
= उभ् + औ + अपि
= उभ् + आव् + अपि
= उभावपि ।

लोपः शाकल्यस्य ॥ ८. ३. १९ ॥ विधिसूत्रम्।

अनुवृत्तिः – व्योः (व्-योः) ८. ३. १८, अ-पूर्वस्य अशि (८. ३. १७), पदस्य (८. १. १६), संहितायाम् (८. २. १०८)। अर्थः–शाकल्याचार्यस्य मतेन पदान्तयोः वकार-यकारयोः अ-वर्णपूर्वयोः लोपः विकल्पेन भवति अशि परतः। अत्र शाकल्यग्रहणं विकल्पार्थम्[1]। अस्यार्थः – पदस्य अन्ते स्थितानाम् अय्, आय्, अव्, आव् इति एषां यकार-वकारयोः लोपः विकल्पेन भवति।[2] तद्यथा –

---

[1] विकल्पविधिविषये क्वचित् पाणिनिः पूर्वेषां व्याकरणाचार्याणां नाम गृह्णाति। तद्यथा –अवङ्स्फोटायनस्य (६. १. १२३), त्रिप्रभृतिषु शाकटायनस्य (८. ४. ५०), ई३ चाक्रवर्मणस्य (६. १. १३०)।

[2] प्रयोगे तावत् यकारस्य प्रायेण लोपः भवति, वकारस्य तु न भवति। तद्यथा, य एते, कस्मा अर्पयसि, बन्धवागच्छ, उभावपि।

(क) ये + एते
= य् + ए + एते
= य् + अय् + एते
= ययेते *अथवा*
यय् + एते
(य् इत्यस्य विकल्पेन लोपः)
= य एते ।

(ख) कस्मै + अर्पयसि
= कस्म् + ऐ + अर्पयसि
= कस्म् + आय् + अर्पयसि
= कस्मायर्पयसि *अथवा*
कस्म् + आय् + अर्पयसि
(य् इत्यस्य विकल्पेन लोपः)
= कस्मा अर्पयसि ।

(ग) बन्धो + आगच्छ
= बन्ध् + ओ + आगच्छ
= बन्ध् + अव् + आगच्छ
= बन्धवागच्छ *अथवा*
बन्ध् + अव् + आगच्छ
(व् इत्यस्य विकल्पेन लोपः)
= बन्ध आगच्छ ।

(घ) उभौ + अपि
= उभ् + औ + अपि
= उभ् + आव् + अपि
= उभावपि *अथवा*
उभ् + आव् + अपि
(व् इत्यस्य विकल्पेन लोपः)
= उभा अपि ।

अवधेयम्

अष्टाध्याय्यां सपाद-सप्ताध्यायी (7 ¼ अध्यायाः), त्रिपादी (¾ अध्यायः) इति भागद्वयम्। तत्र त्रिपादीस्थ-सूत्रेण कार्यं कृत्वा पुनः सपाद-सप्ताध्यायीस्थ-सूत्रेण कार्यं न भवति। लोपः शाकल्यस्य इति त्रिपादीस्थं सूत्रम्। तेन यकार-वकारयोः लोपे कृते ततः सपाद-सप्ताध्यायीस्थ-सूत्रैः स्वरसन्धिः न भवति। अतः य + एते = यैते, कस्मा + अर्पयसि = कस्मार्पयसि, बन्ध + आगच्छ = बन्धागच्छ, उभा + अपि = उभापि इति न कृत्वा य एते, कस्मा अर्पयसि, बन्ध आगच्छ, उभा अपि इति एव वक्तव्यम्।

पूर्वरूपम्

एङः पदान्तादति ॥ ६. १. १०९ ॥ विधिसूत्रम्।

एङः पदान्तात्+अति। अनुवृत्तिः – पूर्वः (६. १. १०७), एकः पूर्वपरयोः (६. १. ८४), संहितायाम् (६. १. ७२)। अर्थः – पदान्तात् एङः अति परतः पूर्वपरयोः स्थाने पूर्वस्य रूपम् एकादेशः भवति। यदि पदस्य अन्ते एङ् (ए/ओ) अस्ति ततश्च अत् (अ) अस्ति तर्हि तयोः स्थाने पूर्वस्य रूपम् एकादेशः भवति। तद्यथा –

ते+अपि=तेऽपि। वने+अत्र=वनेऽत्र। हरे+अव=हरेऽव।

बन्धो + अधीष्व = बन्धोऽधीष्व। गुरो + अव = गुरोऽव।

अवग्रहचिह्नं ऽ पूर्वरूपस्य सूचनार्थं प्रयुक्तम्।

अवधेयम्

ते, वने, हरे, बन्धो, गुरो इति एषां पदानाम् अन्ते ए, ओ स्तः। ते, वने, हरे, बन्धो, गुरो इति एतानि सुबन्तपदानि। किन्तु ने + अन (नयन), शे + अन (शयन), चे + अन (चयन), पो + अन (पवन), भो + अन (भवन) इत्यत्र ने, शे, चे, पो, भो इति एतानि न सुबन्तानि न च तिङन्तानि। अतः एतानि न पदानि। तस्मात् अकारे परे सति एषां पूर्वरूपं न भवति।

प्रकृतिभावः (सन्धिनिषेधः)

ईदूदेद् द्विवचनं प्रगृह्यम् ॥ १. १. ११ ॥ संज्ञासूत्रम्।

ईत् + ऊत् + एत् द्विवचनं प्रगृह्यम्। अर्थः – ई-ऊ-एकारान्तं द्विवचनरूपं प्रगृह्यसंज्ञकं भवति। ततः 'प्लुतप्रगृह्या अचि नित्यम्'

(६. १. १२३) इति सूत्रेण सन्धिनिषेधः। तस्मात् ई-ऊ-एकारान्त-द्विवचन-रूपाणां स्वरवर्णैः सह सन्धिः न भवति। तद्यथा –

मुनी + इमौ = मुनी इमौ	साधू + एतौ = साधू एतौ
मित्रे + इमे = मित्रे इमे	विद्ये + इमे = विद्ये इमे
याचेते + इमौ = याचेते इमौ	दद्वहे + आवाम् = दद्वहे आवाम्

व्यञ्जनसन्धिः

चोः कुः ॥ ८. २. ३० ॥ विधिसूत्रम्।

अनुवृत्तिः – झलि (८. २. २६), अन्ते च (८. २. २९), पदस्य (८. १. १६)। च-वर्गस्य स्थाने क-वर्गादेशः भवति झलि परतः पदान्ते च। झलि परे सति तथा पदान्ते च-वर्गस्य क-वर्गादेशः भवति।

झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः,
ऊष्माणः (श, ष, स, ह)

(चवर्गः + झल् = कवर्गः + झल्) वच् + तुम् = वक्तुम्।
एवम् एव – पच् + तुम् = पक्तुम्। पदान्ते वाच् = वाक्।

झलां जशोऽन्ते ॥ ८. २. ३९ ॥ विधिसूत्रम्।

अनुवृत्तिः – पदस्य (८. १. १६)। अर्थः – पदस्य अन्ते वर्तमानानां झलां जशः आदेशाः भवन्ति।

झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः,
ऊष्माणः (श, ष, स, ह)

जश् – वर्गाणां तृतीयवर्णाः।

वाक् + ईश = वागीश	वाक् + हरि = वाग्हरि

अच् + अन्त = अजन्त
अच् + झल् = अज्झल्
षट् + आनन = षडानन
षट् + वध्वः = षड्वध्वः
सत् + आचार = सदाचार
मरुत् + गण = मरुद्गण
सुप् + अन्त = सुबन्त
अप् + ज = अब्ज

खरि च ॥ ८. ४. ५५ ॥ विधिसूत्रम् ।

अनुवृत्तिः – चर् (८. ४. ५४), झलाम् (८. ४. ५३), संहितायाम् (८. २. १०८)। खरि परतः झलां चर् आदेशः भवति।

खर् – वर्गाणां प्रथम-द्वितीयवर्णाः, श, ष, स
झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, श, ष, स, ह
चर् – वर्गाणां प्रथमवर्णाः, श, ष, स ।

(भ् + छ = प् + छ) अनुष्टुभ् + छन्दः = अनुष्टुप्छन्दः
(द् + त् = त् + त्) भिद् + त्वा = भित्त्वा

वावसाने ॥ ८. ४. ५६ ॥[1] विधिसूत्रम् ।

वा + अवसाने । अनुवृत्तिः – चर् (८. ४. ५४), झलाम् (८. ४. ५३)। अर्थः – अवसाने वर्तमानानां झलां चर् आदेशः विकल्पेन भवति । तद्यथा–वाक्, वाग् । अनुष्टुप्, अनुष्टुब् । रामात्, रामाद् ।

झलां जश् झशि ॥ ८. ४. ५३ ॥[2] विधिसूत्रम् ।

अनुवृत्तिः – संहितायाम् (८. २. १०८) । अर्थः – झशि परतः झलां जश् आदेशः भवति । तद्यथा –

---

[1] खरि परे सति पूर्वसूत्रेण नित्यं चर् आदेशः भवति।

[2] इदं पदमध्ये। पदान्ते तु सर्वत्र झलां जशोऽन्ते (८. २. ३९) इति सूत्रं प्रवर्तते।

झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, श, ष, स, ह
झश् – वर्गाणां तृतीय-चतुर्थवर्णाः
जश् – वर्गाणां तृतीयवर्णाः

(प् + ध = ब् + ध)	अप् + धि = अब्धि
(ध् + ध = द् + ध)	बुध् + धि = बुद्धि
(भ् + ध = ब् + ध)	लभ् + धि = लब्धि

स्तोः श्चुना श्चुः ॥ ८. ४. ४० ॥ विधिसूत्रम् ।

स्+तोः श्+चुना श्+चुः । सकार-तवर्गयोः शकार-चवर्गाभ्यां योगे शकार-चवर्गौ आदेशौ भवतः। सकार-तवर्गयोः शकार-चवर्गाभ्यां सह केनापि क्रमेण संयोगे सति सकार-तवर्गयोः स्थाने क्रमेण शकार-चवर्गौ भवतः। तद्यथा –

(स् + श = श्श)	रामस्[1] + शेते = रामश्शेते
(स् + चवर्गः = श् + चवर्गः)	रामस् + च = रामश्च
(तवर्गः + श = चवर्गः + श)	तत् + शृणु = तच्शृणु

(तवर्गः + चवर्गः = चवर्गः + चवर्गः) यथासङ्ख्यमनुदेशः समानाम् (१. ३. १०) इति सूत्रानुसारेण त्-स्थाने च्, द्-स्थाने ज्, न्-स्थाने ञ् भवति । तद्यथा –

(त् + च = च् + च)	सत् + चित् = सच्चित्
(द् + ज = ज् + ज)	उद् + ज्वल = उज्ज्वल
(न् + ज = ञ् + ज)	राजन् + जय = राजञ्जय

---

[1] विसर्जनीयस्य सः ॥ ८. ३. ३४ ॥ विधिसूत्रम्।

अपवादः

(क) **शात्** ॥ ८. ४. ४४ ॥ निषेधसूत्रम् ।

अनुवृत्तिः – तोः (८. ४. ४३), न (८. ४. ४२), संहितायाम् (८. २. १०८)। अर्थः – शकारात् परस्य तवर्गस्य चवर्गः न भवति। तद्यथा –

(श् + तवर्गः = श् + तवर्गः) अश् + ना + सि = अश्नासि

(ख) **शश्छोऽटि** ॥ ८. ४. ६३ ॥ विधिसूत्रम् ।

शः + छः + अटि। अनुवृत्तिः – झयः अन्यतरस्याम् (८. ४. ६२), संहितायाम् (८. २. १०८)। झयः परस्य शकारस्य अटि परतः छकारादेशः विकल्पेन भवति ।

झय् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः।

अट् – सर्वे स्वराः, ह, य, व, र ।

वाक् + शूर = वाक्छूर, वाक् शूर
वाक् + शक्ति = वाक्छक्ति, वाक् शक्ति

ष्टुना ष्टुः ॥ ८. ४. ४१ ॥ विधिसूत्रम् ।

अनुवृत्तिः – स्तोः (८. ४. ४०), संहितायाम् (८. २. १०८)। अर्थः – सकार-तवर्गयोः षकार-टवर्गाभ्यां योगे षकार-टवर्गौ आदेशौ भवतः। सकार-तवर्गयोः षकार-टवर्गाभ्यां सह केनापि क्रमेण संयोगे सति सकार-तवर्गयोः स्थाने यथाक्रमं षकार-टवर्गौ भवतः। तद्यथा –

(स् + टवर्गः = ष् + टवर्गः) धनुस् + टङ्कार = धनुष्टङ्कार
(ष् + तवर्गः = ष् + टवर्गः) आकृष् + त = आकृष्ट
(स् + ष = ष् + ष) रामस् + षष्ठः = रामष्षष्ठः
(तवर्गः + टवर्गः = टवर्गः + टवर्गः) तत् + टीका = तट्टीका

अपवादः

(क) न पदान्ताट्टोरनाम् ॥ ८. ४. ४२ ॥ निषेधसूत्रम् ।

न पदान्तात् + टोः + अनाम्। अनुवृत्तिः – ष्टुः (८. ४. ४१), स्तोः (८. ४. ४०), संहितायाम् (८. २. १०८)। अर्थः – पदान्तात् ट-वर्गात् परस्य स्तोः ष्टुः न भवति नाम् इति एतत् वर्जयित्वा। तद्यथा – षट् + सन्तः = षट्सन्तः।

(ख) अनाम्-नवति-नगरीणामिति वाच्यम् । (वार्तिकम्)

'न पदान्ताट्टोरनाम्' इति सूत्रे नाम् इति अस्य शब्दस्य वर्जनं कृतम्। वार्तिककारः नवति, नगरी इति शब्दौ तत्र योजयति। अर्थः – यदि पदान्तात् ट-वर्गात् परतः नाम्, नवति, नगरी इति एते शब्दाः सन्ति तर्हि ष्टुत्वप्रतिषेधः न भवति, अस्यार्थः, ष्टुत्वं भवति। तद्यथा–

षट् + नाम् = षट् + णाम् (ष्टुना ष्टुः)
= षण् + णाम् (प्रत्यये भाषायां नित्यम्[1]) = षण्णाम्।

एवम् एव – षट् + नवति = षण्णवति। षट् + नगर्यः = षण्णगर्यः ।

षण्णवति, षण्णगर्यः इति अत्र 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रं प्रवर्तते, न तु 'प्रत्यये भाषायां नित्यम्' इति वार्तिकं यतो हि नवति, नगरी इति न प्रत्ययौ।

(ग) तोः षि ॥ ८. ४. ४३ ॥ निषेधसूत्रम् ।

अनुवृत्तिः – ष्टुः (८. ४. ४१), न (८. ४. ४२), संहितायाम् (८. २. १०८) । षकारे परे सति त-वर्गस्य ट-वर्गः न भवति । तद्यथा –

(तवर्गः + ष = तवर्गः + ष) सरित् + षट्कम् = सरित्षट्कम्

---

[1] यरोऽनुनासिकेऽनुनासिको वा इति सूत्रे वार्तिकम्।

तोर्लि ॥ ८. ४. ६० ॥ विधिसूत्रम् ।

तोः + लि । अनुवृत्तिः – परसवर्णः (८. ४. ५८), संहितायाम् (८. २. १०८)। अर्थः – त-वर्गस्य लकारे परतः परसवर्णादेशः भवति। तद्यथा,

(त् + ल = ल् + ल) तत् + लीन = तल्लीन

(द् + ल = ल् + ल) उद् + लेख = उल्लेख

उदः स्थास्तम्भोः पूर्वस्य ॥ ८. ४. ६१ ॥ विधिसूत्रम् ।

अनुवृत्तिः – सवर्णः (८. ४. ५८), संहितायाम् (८. २. १०८)। अर्थः – उद् इत्यस्मात् परयोः स्था, स्तम्भ इत्यनयोः आदौ वर्तमानस्य सकारस्य स्थाने पूर्वः यः दकारः तस्य सवर्णः थकारः आदेशः भवति। तद्यथा –

उद् + स्थान

= उद् + थ्थान (सकारस्य स्थाने दकारस्य सवर्णः थकारः आदेशः)

= उद् + थान (झरो झरि सवर्णे[1])

= उत् + थान (खरि च)

= उत्थान । एवम् एव – उद् + स्तम्भन = उत्तम्भन ।

झयो होऽन्यतरस्याम् ॥ ८. ४. ६२ ॥ विधिसूत्रम् ।

झयः हः + अन्यतरस्याम् । अनुवृत्तिः – पूर्वस्य (८. ४. ६१), सवर्णः (८. ४. ५८), संहितायाम् (८. २. १०८)। झयः परस्य हकारस्य

---

[1] **झरो झरि सवर्णे** ॥ ८. ४. ६५ ॥ विधिसूत्रम् ।

अनुवृत्तिः – हलः लोपः (८. ४. ६४), अन्यतरस्याम् (८. ४. ६२), संहितायाम् (८. २. १०८) । हलः परस्य झरः विकल्पेन लोपः भवति सवर्णे झरि परे सति। तद्यथा – उद् + स्थान = उद् + थ् + थान । अत्र दकारः हल्, तस्मात् परस्य झरः थकारस्य लोपः, सवर्णे अपरस्मिन् थकारे परे सति।

विकल्पेन पूर्वसवर्णादेशः भवति। झयः परस्य हकारस्य झष् भवति। तद्यथा –

दिक् + हस्ती
= दिग् + हस्ती (झलां जशोऽन्ते)
= दिग् + घस्ती (झयो होऽन्यतरस्याम्)

(क् + ह = ग्घ, ग्ह) दिक् + हस्ती = दिग्घस्ती, दिग्हस्ती
(च् + ह = ज्झ, ज्ह) अच् + हीन = अज्झीन, अज्हीन
(ट् + ह = ड्ढ, ड्ह) षट् + हिंसकाः = षड्ढिंसकाः, षड्हिंसकाः
(त् + ह = द्ध, द्ह) ईषत् + हास = ईषद्धास, ईषद्हास
(प् + ह = ब्भ, ब्ह) अप् + हास = अब्भास, अब्हास

झय् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः ।

झष् – वर्गाणां चतुर्थवर्णाः ।

यरोऽनुनासिकेऽनुनासिको वा ॥ ८. ४. ४५ ॥ विधिसूत्रम् ।

पदान्तस्य यरः अनुनासिके परे सति विकल्पेन अनुनासिकः भवति।

यर् – वर्गीयवर्णाः, अन्तःस्थाः, श, ष, स ।

वाक् + नम्र
= वाग् + नम्र (झलां जशोऽन्ते)
= वाङ् + नम्र (यरोऽनुनासिकेऽनुनासिको वा)

(क् + न = ङ्न, ग्न) वाक् + नम्र = वाङ्नम्र, वाग्नम्र
(ट् + म = ण्म, ड्म) षट् + मुख = षण्मुख, षड्मुख
(त् + न = न्न, द्न) जगत् + नाथ = जगन्नाथ, जगद्नाथ
(त् + म = न्म, द्म) तत् + मास्तु = तन्मास्तु, तद्मास्तु

वाग्नम्र, षड्मुख, जगद्नाथ, तद्मास्तु इति एतानि रूपाणि प्रायेण न प्रयुज्यन्ते।

अपवादः

प्रत्यये भाषायां नित्यम्। (वार्तिकम्)

लौकिकसंस्कृते अनुनासिकादौ प्रत्यये परे सति पूर्वस्य यरः नित्यम् अनुनासिकादेशः भवति। तद्यथा –

(क् + म = ङ्म) वाक् + मय[1] = वाङ्मय

(त् + म = न्म) चित् + मय = चिन्मय

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ८. ३. ३२ ॥ विधिसूत्रम् ।

ङमः ह्रस्वात् + अचि ङमुट् + नित्यम् । अनुवृत्तिः – पदस्य (८. १. १६), संहितायाम् (८. २. १०८)। अर्थः – ह्रस्वात् परः यः ङम् तदन्तं यत् पदं तस्मात् परस्य अचः नित्यं ङमुट् आगमः भवति।

ङमुट् (ङम् + उट्) = ङुट्, णुट्, नुट् । आगमः टित्त्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण अचः आदौ भवति। तद्यथा –

ह्रस्व+ङम् + अच् = ह्रस्व+ङम्+ ङमुट् + अच्।

ङम् – ङ्, ण्, न् ।

ङ् (ङुट्) तिङ् + अतिङ् = तिङ्ङतिङ्

ण् (णुट्) सुगण् + ईश = सुगण्णीश

न् (नुट्) जानन् + अपि = जानन्नपि

---

[1] 'मयट्' एकः प्रत्ययः। हलन्त्यम् इति सूत्रेण टकारस्य इत्संज्ञायां लोपः, ततः 'मय' अवशिष्यते।

एवम् एव – कस्मिन् + अपि = कस्मिन्नपि।

कुर्वन् + एव = कुर्वन्नेव।

अवधेयम्

यदि ङमः पूर्वं दीर्घस्वरः अस्ति तर्हि इदं सूत्रं न प्रवर्तते। तद्यथा –

भगवान् + उवाच = भगवानुवाच

गुरून् + अहत्वा = गुरूनहत्वा

मोऽनुस्वारः ॥ ८. ३. २३ ॥ विधिसूत्रम् ।

अनुवृत्तिः – हलि (८. ३. २२), पदस्य (८. १. १६), संहितायाम् (८. २. १०८)। अर्थः – हलि परे सति पदान्तस्य मकारस्य अनुस्वारः आदेशः भवति। तद्यथा –

पदान्ते म् + हल् = अनुस्वारः + हल्

वनम् गच्छति = वनं गच्छति

मातरम् वन्दे = मातरं वन्दे

वा पदान्तस्य ॥ ८. ४. ५९ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अनुस्वारस्य ययि परसवर्णः (८. ४. ५८), संहितायाम् (८. २. १०८)। अर्थः – ययि परे सति पदान्तस्य अनुस्वारस्य विकल्पेन परसवर्णः भवति।

यय् – सर्वे वर्गीयवर्णाः, अन्तःस्थाः ।

पदान्ते अनुस्वारः + यय् = अनुस्वारस्य विकल्पेन परसवर्णः + यय् ।

तद्यथा – किं करोषि *अथवा* किङ्करोषि ।

चन्द्रं पश्यति *अथवा* चन्द्रम्पश्यति ।

पदमध्ये तु

(क) **नश्चापदान्तस्य झलि** ॥ ८. ३. २४ ॥ विधिसूत्रम् ।

नः + च + अपदान्तस्य झलि । अनुवृत्तिः – मोऽनुस्वारः (८. ३. २३), संहितायाम् (८. २. १०८)। अर्थः – अपदान्तस्य नकारस्य मकारस्य च झलि परे सति अनुस्वारः आदेशः भवति।

झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, ऊष्माणः ।

अपदान्तः (पदमध्यस्थः) न्, म् + झल् = अनुस्वारः + झल् । तद्यथा – मन् + स्यते = मंस्यते । रम् + स्यते = रंस्यते ।

(ख) **अनुस्वारस्य ययि परसवर्णः** ॥ ८. ४. ५८ ॥ विधिसूत्रम् ।

अनुवृत्तिः – संहितायाम् (८. २. १०८) । अर्थः – ययि परे सति अनुस्वारस्य परसवर्णः आदेशः नित्यं भवति ।

यय् – सर्वे वर्गीयवर्णाः, अन्तःस्थाः ।

(पदमध्यस्थः) अनुस्वारः + यय् = परसवर्णस्य अनुनासिकः + यय् । तद्यथा –

हन् + ति = हंति = हन्ति, गम् + तुम् = गंतुम् = गन्तुम् ।

छे च ॥ ६. १. ७३ ॥ विधिसूत्रम् ।

अनुवृत्तिः – संहितायाम् (६. १. ७२), ह्रस्वस्य तुक् (६. १. ७१) । अर्थः – ह्रस्वात् परं छकारे परे सति पूर्वस्य ह्रस्वस्य तुक् आगमः भवति; स च कित्त्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण ह्रस्वात् परं भवति । ह्रस्वस्वरः + छ = ह्रस्वस्वरः + तुक् + छ । तद्यथा –

पद + छद

= पद + तुक् + छद

= पद + त् + छद (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= पद + च् + छद (स्तोः श्चुना श्चुः)
= पदच्छद (sock)।

पदान्ताद् वा ॥ ६. १. ७६ ॥ विधिसूत्रम् ।

अनुवृत्तिः – दीर्घात् (६. १. ७५), छे (६. १. ७३), संहितायाम् (६. १. ७२), तुक् (६. १. ७१)। अर्थः – छकारे परे सति पदान्तस्य दीर्घस्य विकल्पेन तुक् आगमः भवति।

पदान्ते दीर्घस्वरः + छ = पदान्ते दीर्घस्वरः + तुक् (च्) + छ *अथवा* दीर्घस्वरः + छ । तद्यथा –

कुटी + छाया = कुटीच्छाया *अथवा* कुटीछाया ।

विसर्गसन्धिः

विसर्जनीयस्य सः ॥ ८. ३. ३४ ॥ विधिसूत्रम् ।

अनुवृत्तिः – खरि (८. ३. १५), संहितायाम् (८. २. १०८) । खर् – वर्गाणां प्रथम-द्वितीयवर्णाः, श, ष, स । अर्थः – खरि परे सति विसर्जनीयस्य सकारः आदेशः भवति। खरि परे सति विसर्गः स् भवति। तद्यथा – गोविन्दः + तरति = गोविन्दस्तरति ।

रामः + चिन्तयति
= रामस् + चिन्तयति (विसर्जनीयस्य सः)
= रामश् + चिन्तयति (स्तोः श्चुना श्चुः)
= रामश्चिन्तयति ।

गोपालः + टङ्कयति
= गोपालस् + टङ्कयति (विसर्जनीयस्य सः)
= गोपालष् + टङ्कयति (ष्टुना ष्टुः)
= गोपालष्टङ्कयति ।

अलसाः + स्वपन्ति
= अलसास् + स्वपन्ति (विसर्जनीयस्य सः)
= अलसास्स्वपन्ति ।

अथवा अलसाः + स्वपन्ति = अलसाः स्वपन्ति (वा शरि[1])

अलसाः + शेरते
= अलसास् + शेरते (विसर्जनीयस्य सः)
= अलसाश् + शेरते (स्तोः श्चुना श्चुः)
= अलसाश्शेरते ।

अथवा अलसाः + शेरते = अलसाः शेरते (वा शरि)

पुरुषाः + षट्
= पुरुषास् + षट् (विसर्जनीयस्य सः)
= पुरुषाष् + षट् (ष्टुना ष्टुः)
= पुरुषाष्षट् ।

अथवा पुरुषाः + षट् = पुरुषाः षट् (वा शरि)

---

[1] वा शरि ॥ ८. ३. ३६ ॥ विधिसूत्रम् ।

अनुवृत्तिः – विसर्जनीयः (८. ३. ३५), विसर्जनीयस्य (८. ३. ३४), संहितायाम् (८. २. १०८)। अर्थः – विसर्जनीयस्य विकल्पेन विसर्जनीयः आदेशः भवति शरि परतः। शरि परे सति विकल्पेन विसर्गः तथैव तिष्ठति। तद्यथा – अलसाः + स्वपन्ति = अलसाः स्वपन्ति।

स-सजुषो रुः ॥ ८. २. ६६ ॥ विधिसूत्रम् ।

स-सजुषोः रुः। अनुवृत्तिः—पदस्य (८. १. १६)। अर्थः—सकारान्तस्य पदस्य सजुष् इति अस्य षकारस्य च रु आदेशः भवति। तद्यथा —

राम + सु (स्वौजसमौट्०)[1]
= राम + स् (उपदेशेऽजनुनासिक इत्)
= राम + रु (स-सजुषो रुः)
= राम + र् (उपदेशेऽजनुनासिक इत्)
= राम + : (खरवसानयोर्विसर्जनीयः)[2]
= रामः ।

---

[1] **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्-ङसोसाम्ङ्योस्सुप् ॥ ४. १. २ ॥ विधिसूत्रम् ।**

विभक्तिः	*एकवचनम्*	*द्विवचनम्*	*बहुवचनम्*
प्रथमा	सु (स्)	औ	जस् (अस्)
द्वितीया	अम्	औट् (औ)	शस् (अस्)
तृतीया	टा (आ)	भ्याम्	भिस्
चतुर्थी	ङे (ए)	भ्याम्	भ्यस्
पञ्चमी	ङसि (अस्)	भ्याम्	भ्यस्
षष्ठी	ङस् (अस्)	ओस्	आम्
सप्तमी	ङि (इ)	ओस्	सुप् (सु)

[2] **खरवसानयोर्विसर्जनीयः ॥ ८. ३. १५ ॥ विधिसूत्रम् ।**

अनुवृत्तिः — रः (८. ३. १४), पदस्य (८. १. १६), संहितायाम् (८. २. १०८) । अर्थः — रेफान्तस्य पदस्य खरि परतः अवसाने च विसर्जनीयः आदेशः भवति। खर् — वर्गस्य प्रथम-द्वितीयवर्णाः, श, ष, स । खरि, अवसाने च पदान्तस्य रेफस्य (र् इत्यस्य) विसर्गः भवति।

कविस् + लिखति
= कविरु + लिखति (स-सजुषो रुः)
= कविर्[1] + लिखति (उपदेशेऽजनुनासिक इत्)
= कविर्लिखति।
एवम् एव –
कविस् + अलिखत् = कविरलिखत्
गुरुस् + ब्रह्मा = गुरुर्ब्रह्मा

अतो रोरप्लुतादप्लुते ॥ ६. १. ११३ ॥ विधिसूत्रम् ।

अतः रोः + अप्लुतात् + अप्लुते । न प्लुतः अप्लुतः। अनुवृत्तिः – उत् ((६. १. १११), अति (६. १. १०९), संहितायाम् (६. १. ७२)। अर्थः – अप्लुतात् अकारात् परस्य रोः उत् आदेशः भवति यदि रोः परम् अप्लुतः अकारः स्यात्। ह्रस्वात् अकारात् परं रुः, ततः ह्रस्वः अकारः अस्ति चेत् रोः (रेफस्य) स्थाने उकारः आदेशः भवति । तद्यथा–
अ + रु + अ = अ + उ + अ।

रामस्[2] + अपि
= रामरु + अपि (स-सजुषो रुः)
= रामर् + अपि (उपदेशेऽजनुनासिक इत्)
= रामउ + अपि (अतो रोरप्लुतादप्लुते)
= राम् + अ + उ + अपि

---

[1] अत्र रेफः अवसाने नास्ति न च स खर्परः, अतः रेफस्य विसर्गः न भवति।

[2] 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण सु इत्यस्य उकारस्य इत्संज्ञायां लोपे कृते स् अवशिष्यते। इत्संज्ञकवर्णः परिधानवत्। सः प्रत्ययस्य अवयवः न भवति। अतः अत्र स् प्रथमैकवचन-प्रत्ययः।

= राम् + ओ + अपि (आद् गुणः)
= रामोऽपि (एङः पदान्तादति)

हशि च ॥ ६. १. ११४ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अतः रोः (६. १. ११३), उत् (६. १. १११), संहितायाम् (६. १. ७२)। हशि परे सति अप्लुतात् अतः (अकारात् परस्य) रोः उत् (उ) आदेशः भवति।

हश् – ह, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमवर्णाः। यदि हश् परतः अस्ति तर्हि अकारपूर्व-'रु'स्थाने उ आदेशः भवति। तद्यथा –

रामस् गच्छति
= रामरु गच्छति (स-सजुषो रुः)
= रामउ गच्छति (हशि च)
= राम् + अ + उ गच्छति
= राम् + ओ गच्छति (आद् गुणः)
= रामो गच्छति ।

भोभगोअघोअपूर्वस्य योऽशि ॥ ८. ३. १७ ॥ विधिसूत्रम् ।

भोः च भगोः च अघोः च अः च = भोभगोअघोआः । भोभगोअघोआः पूर्वाः यस्य सः भोभगोअघोअपूर्वः । अनुवृत्तिः – रोः (८. ३. १६), रः (८. ३. १४), संहितायाम् (८. २. १०८)। अर्थः – भो, भगो, अघो इतिपूर्वकस्य अवर्णपूर्वकस्य (अ, आ इतिपूर्वकस्य) च रोः (रु इत्यस्य रेफस्य) यकारादेशः भवति अशि परतः। भोस्, भगोस्, अघोस् इति एते निपाताः । अश् – सर्वे स्वराः, ह, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चम-वर्णाः। तद्यथा –

भोस् + अत्र

= भोरु + अत्र (स-सजुषो रुः)

= भोर् + अत्र (उपदेशेऽजनुनासिक इत्)

= भोय् + अत्र (भोभगोअघोअपूर्वस्य योऽशि)

= भो + अत्र (ओतो गार्ग्यस्य ८. ३. २०)

= भो अत्र ।

एवम् एव –

भगोस् + अत्र = भगो अत्र

अघोस् + अत्र = अघो अत्र

बालकस् + आगच्छति

= बालकरु + आगच्छति (स-सजुषो रुः)

= बालकर् + आगच्छति (उपदेशेऽजनुनासिक इत्)

= बालकय् + आगच्छति (भोभगोअघोअपूर्वस्य योऽशि)

= बालक + आगच्छति (लोपः शाकल्यस्य)

= बालक आगच्छति ।

एवम् एव –

बालकस् + इच्छति = बालक इच्छति

बालकस् + ईक्षते = बालक ईक्षते

बालकस् + उपविशति = बालक उपविशति

बालकास् + अगच्छन् = बालका अगच्छन्

बालकास् + आगच्छन्ति = बालका आगच्छन्ति

बालकास् + इच्छन्ति = बालका इच्छन्ति

बालकास् + ईक्षन्ते = बालका ईक्षन्ते

बालकास् + उपविशन्ति = बालका उपविशन्ति

बालकास् + गायन्ति = बालका गायन्ति

बालकास् + जयन्ति = बालका जयन्ति

बालकास् + ददति = बालका ददति

बालकास् + बोधन्ति = बालका बोधन्ति

बालकास् + हसन्ति = बालका हसन्ति

बालकास् + धरन्ति = बालका धरन्ति

बालकास् + नयन्ति = बालका नयन्ति

बालकास् + यान्ति = बालका यान्ति

बालकास् + वदन्ति = बालका वदन्ति

णत्वविधानम्

रषाभ्यां नो णः समानपदे ॥ ८. ४. १ ॥ विधिसूत्रम् ।

अनुवृत्तिः – संहितायाम् (८. २. १०८)। अर्थः – रेफ-षकाराभ्यां परस्य नकारस्य णकारादेशः भवति समानपदे (अखण्डपदे)। र्, ष् इति आभ्यां परस्य नकारस्य णकारः भवति समानपदे (अखण्डपदे) । तद्यथा – पूर्ण, तूर्ण, अर्णव, चतुर्णाम्, पुष्णाति, मुष्णाति ।

'ऋकारान्नस्य णत्वं वाच्यम्' इति वार्तिकानुसारेण ऋकारात् परस्य नकारस्य अपि णकारः भवति। तद्यथा – तिसृणाम्, चतसृणाम्, पितृणाम्, मातृणाम्।

'तस्मादित्युत्तरस्य' (१. १. ६७) इति सूत्रानुसारेण यस्मिन् सूत्रे पञ्चम्यन्तं पदम् उपयुज्य कार्यं विधीयते तत् कार्यं पञ्चम्यन्तात् परस्य अव्यवहितस्य एव भवति। तेन र-षाभ्यां परस्य अव्यवहितस्य नकारस्य एव णकारः स्यात्। किन्तु कैश्चिद् वर्णैः व्यवधानेऽपि णकारः इष्यते। तदर्थम् अट्कुप्वाङुनुम्व्यवायेऽपि इति सूत्रम् आरभ्यते।

अट्कुप्वाङुनुम्व्यवायेऽपि ॥ ८. ४. २ ॥ विधिसूत्रम् ।

अट्कुपु+आङुनुम्व्यवाये+अपि।

अट् – सर्वे स्वराः, ह, य, व, र ।

कु – कवर्गः (क ख ग घ ङ)

पु – पवर्गः (प फ ब भ म)

नुम् – अनुस्वारः

आङ – आ (उपसर्गः)

अट्, कु, पु, नुम्, आङ इति एषां व्यवधाने सत्यपि र्, ष् इति आभ्यां परवर्तिनः नकारस्य णकारः भवति। तद्यथा –

अट् – हरिणा (इ[1]), विषयेण (अ-य्-ए), पुरुषेण (ए)।

ऋकारविषयेऽपि – पितृव्येण (व्-य्-ए), वृक्षेण (ए)।

कु – अर्केण, मूर्खाणाम्, गर्गेण, अर्घ्येण ।

पु – दर्पेण, गर्भेण, कर्मणा, चर्मणा ।

---

[1] ह् + अ + र् + इ + ण् + आ। अत्र र्, ण् इत्यनयोः मध्ये इ (अट्) व्यवधानरूपेण वर्तते।

अन्यानि उदाहरणानि –

रिपुणा (इ-प्-उ), राघवेण (आ-घ्-अ-व्-ए), वृकेण (क्-ए), शुष्केण (क्-ए), पुष्पेण (प्-ए), अग्रणीः (अ), पूर्वाह्णः (व्-आ-ह्), अपराह्णः (आ-ह्)।

प्रत्युदाहरणानि –

भरतेन → भ् + अ + र् + अ +त् (अनभिमत-वर्णः) + ए + न् + अ = भरतेन । एवम् एव – गरलेन, शृगालेन, अर्थेन, आर्तेन, पर्वतेन, कृष्णेन, दर्शनम्, स्पर्शनम्, रटनम्, अर्चनम्। एषु सर्वेषु अनभिमत-वर्णः क्रमेण ल, ल, थ, त, त, ण, श, श, ट, च ।

यदि समानपदं न स्यात्, यदि निमित्तं (र् अथवा ष्) एकस्मिन् पदे, नकारः अपरस्मिन् पदे स्यात् तर्हि नकारस्य णकारः न भवति। तद्यथा, रघुनाथ, गिरिनन्दिनी, त्रिनेत्र, सर्वनाम, चारुनेत्र, रघुनन्दन, दीर्घनयन, चित्रभानु, वृषवाहन, गिरिगहन दुर्नाम, अहर्निशम्, पुनर्नयति। किन्तु 'पूर्वपदात् संज्ञायामगः' (८. ४. ३) इति सूत्रानुसारेण समासघटक-पूर्वपदे र-षौ, उत्तरपदे नकारः चेदपि णत्वं भवति यदि तत् पदं संज्ञा स्यात्। तद्यथा – रामायणम्, शूर्पणखा, उत्तरायणम्।

पाणिनीय-व्याकरणानुसारेण उपसर्गाः पृथक् पदानि। तेन समान-पदत्वस्य अभावात् उपसर्गे विद्यमानाभ्यां र-षाभ्यां परस्य धात्वादिस्थस्य नकारस्य णकारः न स्यात्। किन्तु निर्णय, प्रणाम, प्रणमति, परिणयति इत्यादौ णकारः इष्यते। तदर्थम् 'उपसर्गाद-समासेऽपि णोपदेशस्य' (८. ४. १४) इति अन्यदेकं सूत्रं पाणिनिना विरचितम्।

पाणिनीय-व्याकरणे णत्व-विधायकानि त्रिंशतः अधिकानि सूत्राणि सन्ति।

पदान्तस्य ॥ ८. ४. ३७ ॥ निषेधसूत्रम् ।

अनुवृत्तिः – न (८. ४. ३४), अट्कुप्वाङ्नुम्व्यवायेऽपि (८. ४. २), रषाभ्यां नो णः (८. ४. १), संहितायाम् (८. २. १०८)। अर्थः – पदान्तस्य नकारस्य णकारादेशः न भवति। तद्यथा – रामान्, वृक्षान्, गुरून्, अधरन्, अहरन्, अचरन्, हे करिन्, हे पूषन् । अत्र पदान्तः नकारः (न्) णकारः (ण्) न भवति।

क्त, क्तवतु, क्त्वा

क्त-क्तवतू निष्ठा ॥ १. १. २६ ॥ संज्ञासूत्रम् ।

क्त-क्तवतु-प्रत्यययोः निष्ठा इति संज्ञा। निष्ठा नाम परिसमाप्तिः। अतः इमौ क्रियापरिसमाप्तिवाचकौ प्रत्ययौ। इमौ आर्धधातुकप्रत्ययौ।

समानकर्तृकयोः पूर्वकाले ॥ ३. ४. २१ ॥ विधिसूत्रम् ।

अनुवृत्तिः – क्त्वा (३. ४. १८), धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानात् धातोः क्त्वा-प्रत्ययः भवति। तद्यथा – "गोविन्दः प्रथमं खादति, ततः विद्यालयं गच्छति।" अत्र खाद्, गम् इति द्वयोः धात्वोः कर्ता 'गोविन्दः' समानः, खादनक्रिया च गमनक्रियायाः पूर्वकालिका । अतः उपर्युक्त-सूत्रानुसारेण खाद्धातोः क्त्वा प्रत्ययः भवति। तेन "गोविन्दः खादित्वा विद्यालयं गच्छति" इति कथ्यते। क्त्वा आर्धधातुक-प्रत्ययः। क्त्वा-प्रत्ययान्त-शब्दः अव्ययसंज्ञकः।

क्त, क्तवतु, क्त्वा इति एषु त्रिषु आर्धधातुक-प्रत्ययेषु क् अस्ति। अयं क् इत्संज्ञकः। कित्(क्+इत्)कारणात् एते त्रयः प्रत्ययाः गुणवृद्धि-प्रतिबन्धकाः।

खाद् + क्त
= खाद् + इट् + क्त (आर्धधातुकस्येड् वलादेः[1], आद्यन्तौ टकितौ[2])
= खाद् + इ + क्त (हलन्त्यम्)
= खाद् + इ + त (लशक्वतद्धिते)
= खादित ।

क्त-प्रत्ययान्त-शब्दस्य लिङ्गं वचनं च परिवर्तते। तद्यथा – मया मिष्टान्नं खादितम्। मया रसगोलः खादितः। मया पूरिका खादिता। अत्र क्त-प्रत्ययः कर्मणि प्रयुक्तः।

	एकवचनम्	*द्विवचनम्*	*बहुवचनम्*
(नपुंसके)	खादितम्	खादिते	खादितानि

---

[1] आर्धधातुकस्येड् वलादेः ॥ ७. २. ३५ ॥ विधिसूत्रम् ।

आर्धधातुकस्य + इट् वलादेः। वल् आदि यस्य स वलादिः। वल् इति यकारं विहाय सर्वे व्यञ्जनवर्णाः। अर्थः – वलादेः आर्धधातुकस्य इडागमः (इट् + आगमः) भवति।

अनुबन्धाः (इत्संज्ञक-वर्णाः) परिधानवत् । ते प्रत्ययस्य अवयवाः न भवन्ति । तेन क्त, क्तवतु, क्त्वा इत्यत्र त, तवत्, त्वा एव प्रत्ययाः । एषाम् आदिः तकारः वल्प्रत्याहारान्तर्गतः। अतः एते वलादयः । तस्मात् इडागमः ।

[2] आद्यन्तौ टकितौ ॥ १. १. ४६ ॥ परिभाषासूत्रम् ।

आदि + अन्तौ ट-क् + इतौ । टित् (ट् + इत्) आगमः आदौ भवति, कित् (क् + इत्) आगमः अन्ते भवति। अत एव इट् आगमः क्त-प्रत्ययस्य आदौ प्रयुक्तः। कित्कारणात् आने मुक् (७. २. ८२) इति सूत्रेण विधीयमानः मुक् आगमः अङ्गस्य अन्ते प्रयुक्तः। तद्यथा, वन्द + मुक् + आन = वन्द + म् + आन = वन्दमान (द्रष्टव्यं पृ. ३९)।

(पुंलिङ्गे)	खादितः	खादितौ	खादिताः
(स्त्रीलिङ्गे)	खादिता	खादिते	खादिताः

खाद् + क्तवतु
= खाद् + इट् + क्तवतु (आर्धधातुकस्येड् वलादेः)
= खाद् + इट् + क्तवत् (उपदेशेऽजनुनासिक इत्)
= खाद् + इट् + तवत् (लशक्वतद्धिते)
= खाद् + इ + तवत् (हलन्त्यम्)
= खादितवत् ।

क्तवतु-प्रत्ययान्त-शब्दस्य लिङ्गं वचनं च परिवर्तते। तद्यथा – मम मित्रं खादितवत्। मम भ्राता खादितवान्। मम भगिनी खादितवती। अत्र क्तवतु-प्रत्ययः कर्तरि प्रयुक्तः।

	एकवचनम्	*द्विवचनम्*	*बहुवचनम्*
(नपुंसके)	खादितवत्	खादितवती	खादितवन्ति
(पुंलिङ्गे)	खादितवान्	खादितवन्तौ	खादितवन्तः
(स्त्रीलिङ्गे)	खादितवती	खादितवत्यौ	खादितवत्यः

खाद् + क्त्वा
= खाद् + इट् + क्त्वा (आर्धधातुकस्येड् वलादेः)
= खाद् + इट् + त्वा (लशक्वतद्धिते)
= खाद् + इ + त्वा (हलन्त्यम्)
= खादित्वा ।

क्त्वा-प्रत्ययान्त-शब्दः अव्ययसंज्ञकः। तस्य लिङ्गं वचनं च न वर्तते।

अधोलिखित-धातूनां क्त-क्तवतु-क्त्वा-प्रत्ययान्तं रूपं दर्शय । तद्यथा – हस् + क्त = हसित, हस् + क्तवतु = हसितवत्, हस् + क्त्वा = हसित्वा । एवम् एव –

अर्ज्	कम्प्	कुप्	कूज्	क्रन्द्	क्रीड्
खेल्	गर्ज्	घट्	चल्	चर्व्	चेष्ट्
जल्प्	जीव्	ज्वल्	धाव्	निन्द्	पत्
पठ्	फल्	बाध्	भाष्	मन्थ्	मिल्
रक्ष्	रुच्	लिख्	वन्द्	शङ्क्	शिक्ष्

इडभावः (इट् + अभावः)

एकाच उपदेशेऽनुदात्तात् ॥ ७. २. १० ॥ निषेधसूत्रम्।

एकाचः + उपदेशे + अनुदात्तात् । एकः अच् यस्मिन् स एकाच्, तस्मात्। अनुवृत्तिः – नेट् (न + इट्) ७. २. ८ । अर्थः – उपदेशे यः धातुः एकाच् (एकस्वरविशिष्टः) अनुदात्तः च तस्मात् परस्य प्रत्ययस्य इडागमः (इट् + आगमः) न भवति। तद्यथा –

कृ + क्त
= कृ + त (लशक्वतद्धिते)
= कृत ।

कृ + क्तवतु
= कृ + क्तवत् (उपदेशेऽजनुनासिक इत्)
= कृ + तवत् (लशक्वतद्धिते)
= कृतवत् ।

कृ + क्त्वा
= कृ + त्वा (लशक्वतद्धिते)
= कृत्वा ।

अधोलिखितानाम् एकाच्-धातूनां क्त-क्त्वा-क्तवतु-प्रत्ययान्तं रूपं दर्शय। तद्यथा –

स्मृ + क्त = स्मृत, स्मृ + क्त्वा = स्मृत्वा, स्मृ + क्तवतु = स्मृतवत् ।

क्री	क्षिप्	घ्रा	चि	जि	ज्ञा
तप्	तृप्	दृप्	द्रु	धृ	नी
मृ	लिप्	लुप्	शक्	श्रु	स्तु
स्ना	स्मि	ह्व			

मुच् + क्त
= मुच् + त (लशक्वतद्धिते)
= मुक् + त (चोः कुः)
= मुक्त ।

एवम् एव – मुच् + क्त्वा = मुक्त्वा, मुच् + क्तवतु = मुक्तवत् ।
रिच् + क्त = रिक्त, रिच् + क्त्वा = रिक्त्वा, रिच् + क्तवतु = रिक्तवत् । सिच् + क्त = सिक्त, सिच् + क्त्वा = सिक्त्वा, सिच् + क्तवतु = सिक्तवत्।

त्यज् + क्त
= त्यग् + क्त (चोः कुः)
= त्यक् + क्त (खरि च)
= त्यक् + त (लशक्वतद्धिते)
= त्यक्त । एवम् एव –

त्यज् + क्त्वा = त्यक्त्वा, त्यज् + क्तवतु = त्यक्तवत् ।
युज्+क्त = युक्त, युज्+क्त्वा = युक्त्वा, युज्+क्तवतु = युक्तवत् ।
भुज्+क्त = भुक्त, भुज्+क्त्वा = भुक्त्वा, भुज्+क्तवतु = भुक्तवत् ।

बुध् + क्त
= बुध् + त (लशक्वतद्धिते)

= बुध् + ध (झषस्तथोर्धोऽधः[1])
= बुद् + ध (झलां जश् झशि)
= बुद्ध । एवम् एव –
बुध् + क्त्वा = बुद्ध्वा, बुध् + क्तवतु = बुद्धवत् ।

क्रुध्+क्त = क्रुद्ध, क्रुध्+क्त्वा = क्रुद्ध्वा, क्रुध्+क्तवतु = क्रुद्धवत् ।
युध्+क्त = युद्ध, युध्+क्त्वा = युद्ध्वा, युध्+क्तवतु = युद्धवत् ।
रुध्+क्त = रुद्ध, रुध्+क्त्वा = रुद्ध्वा, रुध्+क्तवतु = रुद्धवत् ।
वृध्+क्त = वृद्ध, वृध्+क्त्वा = वृद्ध्वा, वृध्+क्तवतु = वृद्धवत् ।
शुध्+क्त = शुद्ध, शुध्+क्त्वा = शुद्ध्वा, शुध्+क्तवतु = शुद्धवत् ।
सिध्+क्त=सिद्ध, सिध्+क्त्वा = सिद्ध्वा, सिध्+क्तवतु = सिद्धवत् ।
रभ्+क्त = रब्ध, रभ्+क्त्वा = रब्ध्वा, रभ्+क्तवतु = रब्धवत् ।
लभ्+क्त = लब्ध, लभ्+क्त्वा = लब्ध्वा, लभ्+क्तवतु = लब्धवत् ।

छिद् + क्त
= छिद् + त (लशक्वतद्धिते)
= छिन् + न (रदाभ्यां निष्ठातो नः पूर्वस्य च दः)[2]

---

[1] झषस्तथोर्धोऽधः ॥ ८. २. ४० ॥ विधिसूत्रम् ।

झषः + त-थोः + धः + अधः । अर्थः – झषः परयोः तकार-थकारयोः स्थाने धकारः आदेशः भवति धा-धातुं वर्जयित्वा। जुहोत्यादि-गणस्य धा-धातुं वर्जयित्वा झषः परतः त-थ-स्थाने धः आदेशः भवति।

झष् – वर्गाणां चतुर्थवर्णाः।

[2] रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ८. २. ४२ ॥ विधिसूत्रम् ।

अर्थः – रेफ-दकाराभ्यां परस्य निष्ठा-तकारस्य तत्पूर्व-दकारस्य च नकारः आदेशः भवति। र्, द् इति एताभ्यां परतः निष्ठा-तकारस्य नकारः आदेशः भवति, निष्ठा-तकारात् पूर्वस्य दकारस्य च नकारः आदेशः भवति।

= छिन्न । एवम् एव – छिद् + क्तवतु = छिन्नवत् ।

खिद् + क्त = खिन्न, खिद् + क्तवतु = खिन्नवत् ।

पद् + क्त = पन्न, पद् + क्तवतु = पन्नवत् ।

भिद् + क्त = भिन्न, भिद् + क्तवतु = भिन्नवत् ।

सद् + क्त = सन्न, सद् + क्तवतु = सन्नवत् ।

स्विद् + क्त = स्विन्न, स्विद् + क्तवतु = स्विन्नवत् ।

छिद् + क्त्वा

= छिद् +त्वा (लशक्वतद्धिते)

= छित् + त्वा (खरि च)

= छित्त्वा । एवम् एव –

खिद् + क्त्वा = खित्त्वा, पद् + क्त्वा = पत्त्वा, भिद् + क्त्वा = भित्त्वा, सद् + क्त्वा = सत्त्वा, स्विद् + क्त्वा = स्वित्त्वा ।

दृश् + क्त

= दृष् + क्त (व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः)[1]

= दृष् + त (लशक्वतद्धिते)

= दृष् + ट (ष्टुना ष्टुः)

= दृष्ट । एवम् एव –

दृश् + क्त्वा = दृष्ट्वा, दृश् + क्तवतु = दृष्टवत् ।

---

[1] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥ ८. २. ३६ ॥ विधिसूत्रम् ।

अनुवृत्तिः – झलि (८. २. २६), अन्ते च (८. २. २९), पदस्य (८. १. १६)। अर्थः – व्रश्च् to cut, भ्रस्ज् to fry, सृज् to create, मृज् to clean, यज् to sacrifice, राज् to shine, भ्राज् to shine इति एतेषाम्, छकारान्तानां शकारान्तानां च धातूनां षकारः आदेशः भवति झलि परे पदान्ते च।

इष् + क्त
= इष् + त (लशक्वतद्धिते)
= इष् + ट (ष्टुना ष्टुः)
= इष्ट । एवम् एव –
इष् + क्त्वा = इष्ट्वा, इष् + क्तवतु = इष्टवत् ।

अधोलिखित-धातूनां क्त-क्त्वा-क्तवतु-प्रत्ययान्तं रूपं दर्शय।

कृष्	क्रुश्	तुष्	दिश्	दुष्	द्विष्
नश्	पिष्	पुष्	मृश्	रुष्	विश्
वृष्	शिष्	श्लिष्	स्पृश्	सृज्	हृष्

तुमुन्, तव्यत्, तृच्

खाद् + तुमुन्
= खाद् + तुमु (हलन्त्यम्)
= खाद् + तुम् (उपदेशेऽजनुनासिक इत्)
= खाद् + इट् + तुम् (आर्धधातुकस्येड् वलादेः)
= खाद् + इ + तुम् (हलन्त्यम्)
= खादितुम् ।

तुमुन्-प्रत्ययान्त-शब्दः अव्ययसंज्ञकः। तस्य लिङ्गं वचनं च न परिवर्तते।

खाद् + तव्यत्
= खाद् + तव्य (हलन्त्यम्)
= खाद् + इट् + तव्य (आर्धधातुकस्येड् वलादेः)
= खाद् + इ + तव्य (हलन्त्यम्)
= खादितव्य ।

तव्यत्-प्रत्ययान्त-शब्दस्य लिङ्गं वचनं च परिवर्तते। तद्यथा –

अद्य मिष्टान्नं खादितव्यम्। अद्य रसगोलः खादितव्यः। अद्य पूरिका खादितव्या।

	एकवचनम्	*द्विवचनम्*	*बहुवचनम्*
(नपुंसके)	खादितव्यम्	खादितव्ये	खादितव्यानि
(पुंलिङ्गे)	खादितव्यः	खादितव्यौ	खादितव्याः
(स्त्रीलिङ्गे)	खादितव्या	खादितव्ये	खादितव्याः

खाद् + तृच्
= खाद् + तृ (हलन्त्यम्)
= खाद् + इट् + तृ (आर्धधातुकस्येड् वलादेः)
= खाद् + इ + तृ (हलन्त्यम्)
= खादितृ ।

	एकवचनम्	*द्विवचनम्*	*बहुवचनम्*
खादितृ (पुंलिङ्गे)	खादिता	खादितारौ	खादितारः
(स्त्रीलिङ्गे)	खादित्री	खादित्र्यौ	खादित्र्यः
(नपुंसकलिङ्गे)	खादितृ	खादितृणी	खादितृणि

अधोलिखित-धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय। तद्यथा – परि + अट् + तुमुन् = पर्यटितुम्, परि + अट् + तव्यत् = पर्यटितव्य, परि + अट् + तृच् = पर्यटितृ ।

एवम् एव –

अर्च्	अर्ज्	परि+ईक्ष्	कम्प्	कूज्	कूर्द्
क्रन्द्	आ-क्रम्	क्रीड्	क्षम्	खेल्	आ-चर्

चल्	जप्	जल्प्	जीव्	जृम्भ्	धाव्
आ-नन्द्	पठ्	पत्	फल्	बाध्	भाष्
भिक्ष्	भ्रम्	मन्थ्	प्र-यत्	याच्	रक्ष्
लङ्घ्	आ-लप्	अभि-लष्	वद्	वन्द्	वम्
वाञ्छ्	शङ्क्	प्र-शंस्	शिक्ष्	श्रम्	श्वस्
सेव्	स्खल्	स्पन्द्	हस्	हिंस्	

गुणः

कुप् + तुमुन्
= कुप् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= कुप् + इट् + तुम् (आर्धधातुकस्येड् वलादेः)
= कुप् + इ + तुम् (हलन्त्यम्)
= क् + उ + प् + इ + तुम्
= क् + ओ + प् + इ + तुम् (पुगन्तलघूपधस्य च)
= कोपितुम् ।

एवम् एव –

कुप् + तव्यत् = कोपितव्य, कुप् + तृच् = कोपितृ ।

अधोलिखित-धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय। तद्यथा – लिख् + तुमुन् = लेखितुम्, लिख् + तव्यत् = लेखितव्य, लिख् + तृच् = लेखितृ। नृत् + तुमुन् = नर्तितुम्, नृत् + तव्यत् = नर्तितव्य, नृत् + तृच् = नर्तितृ।

एवम् एव –

कृत् क्लिश् वृत् वृध् शुभ् स्निह् हृष् इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय ।

इडभावः (इट् + अभावः)

स्ना + तुमुन्
= स्ना + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= स्नातुम् । (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)

एवम् एव – स्ना + तव्यत् = स्नातव्य, स्ना + तृच् = स्नातृ।

अधोलिखितानाम् एकाच्-धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय –

आ-ख्या	घ्रा	ज्ञा	तप्	दा	धा
पा	मा	या	वा	स्था	हा

अधोलिखित-धातूनाम् 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण इट्-निषेधः भवति। तद्यथा –

आप्+तुमुन् = आप्तुम्, आप्+तव्यत् = आप्तव्य, आप्+तृच् =आप्तृ।
हन्+तुमुन् = हन्तुम्, हन्+तव्यत् = हन्तव्य, हन्+तृच् = हन्तृ।

एवम् एव वप् शप् स्वप् मन् शक् वस् (निवासे) इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय ।

गुणः

कृ + तुमुन्
= कृ + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= कृ + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= क् + ऋ + तुम्
= क् + अर् + तुम् (सार्वधातुकार्धधातुकयोः, उरण् रपरः)
= कर्तुम् । कृ + तव्यत् = कर्तव्य, कृ + तृच् = कर्तृ ।

एवम् एव आ-दृ, धृ, मृ, अनु-सृ, स्मृ, ह्व इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय ।

चि + तुमुन्
= चि + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= चि + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= च् + इ + तुम्
= च् + ए + तुम् (सार्वधातुकार्धधातुकयोः)
= चेतुम् । एवम् एव –
चि + तव्यत् = चेतव्य, चि + तृच् = चेतृ ।
श्रु + तुमुन् = श्रोतुम्, श्रु + तव्यत् = श्रोतव्य, श्रु + तृच् = श्रोतृ ।
स्तु+तुमुन् = स्तोतुम्, स्तु+तव्यत् = स्तोतव्य, स्तु+तृच् = स्तोतृ ।
क्री + तुमुन्
= क्री + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= क्री + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= क् + र् + ई + तुम्
= क् + र् + ए + तुम् (सार्वधातुकार्धधातुकयोः)
= क्रेतुम् । क्री + तव्यत् = क्रेतव्य, क्री + तृच् = क्रेतृ ।

एवम् एव नी, प्री, भी, वि-ली इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय ।

क्षिप् + तुमुन्
= क्षिप् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= क्षिप्[1] + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)

---

[1] कुप्-धातुरपि एकाच्, तस्य इट् आगमः भवति । क्षिप्-धातोः इट् आगमः कुतः न भवति ?

= क्ष् + इ + प् + तुम्
= क्ष् + ए + प् + तुम् (पुगन्तलघूपधस्य च)
= क्षेप्तुम् । एवम् एव –
क्षिप् + तव्यत् = क्षेप्तव्य, क्षिप् + तृच् = क्षेप्तृ ।

उत्तरम् – अधःप्रदत्ताः १०३ एकाचः, हलन्ताः धातवः अनुदात्ताः। एषाम् इट् आगमः न भवति। क्षिप्-धातुः एषु अस्ति। अतः इट् आगमः न भवति। कुप्-धातुः एषु नास्ति। अतः इट् आगमः भवति।

ककारान्ताः – शक् । *चकारान्ताः* – पच्, मुच्, रिच्, वच्, विच्, सिच् । *छकारान्ताः* – प्रच्छ् । *जकारान्ताः* – त्यज्, निज्, भज्, भञ्ज्, भुज्, भ्रस्ज्, मस्ज्, यज्, युज्, रुज्, रञ्ज्, विज्, स्वञ्ज्, सञ्ज्, सृज् । *दकारान्ताः* – अद्, क्षुद्, खिद्, छिद्, तुद्, नुद्, पद्, भिद्, विद्, विनद्, विन्द्, शद्, सद्, स्विद्, स्कन्द्, हद् । *धकारान्ताः* – क्रुध्, क्षुध्, बुध्, बन्ध्, युध्, रुध्, राध्, व्यध्, साध्, शुध्, सिध् । *नकारान्तौ* – मन्, हन् । *पकारान्ताः* – आप्, क्षिप्, छुप्, तप्, तिप्, तृप्, दृप्, लिप्, लुप्, वप्, शप्, सृप्, स्वप् । *भकारान्ताः* –यभ्, रभ्, लभ् । *मकारान्ताः* – गम्, नम्, यम्, रम् । *शकारान्ताः* – क्रुश्, दंश्, दिश्, दृश्, मृश्, रिश्, रुश्, लिश्, विश्, स्पृश् । *षकारान्ताः* – कृष्, त्विष्, तुष्, द्विष्, दुष्, पुष्, पिष्, विष्, शिष्, शुष्, श्लिष् । *सकारान्तौ* – घस्, वस् । *हकारान्ताः* – दह्, दिह्, दुह्, नह्, मिह्, रुह्, लिह्, वह् । एते १०३ एकाच्-हलन्त-धातवः अनिटः (अनुदात्तोपदेशाः) । अधोलिखिताः स्वरान्त-धातवोऽपि अनिटः (अनुदात्तोपदेशाः) ।

आकारान्ताः – सर्वेऽपि। *इकारान्ताः* – श्वि, श्रिञ् इति एतौ वर्जयित्वा। *ईकारान्ताः* – डीङ्, शीङ् इति एतौ वर्जयित्वा। *उकारान्ताः* – रु, क्ष्णु, यु, स्नु, नु, क्षु इति एतान् वर्जयित्वा। *ऋकारान्ताः* – वृङ्, वृञ् इति एतौ वर्जयित्वा । एजन्ताः आकारान्ताः भवन्ति, अतः ते सर्वेऽपि अनिटः ।

अवधेयम् – ऊकारान्ताः ॠकारान्ताश्च सेटः (उदात्तोपदेशाः) भवन्ति ।

लिप् + तुमुन् = लेप्तुम्, लिप् + तव्यत् = लेप्तव्य,
लिप् + तृच् = लेप्तृ ।

तुष् + तुमुन्
= तुष् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= तुष् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= त् + उ + ष् + तुम्
= त् + ओ + ष् + तुम् (पुगन्तलघूपधस्य च)
= त् + ओ + ष् + टुम् (ष्टुना ष्टुः)
= तोष्टुम् । एवम् एव –

तुष् + तव्यत् = तोष्टव्य, तुष् + तृच् = तोष्टृ ।
श्लिष् + तुमुन् = श्लेष्टुम्, श्लिष् + तव्यत् = श्लेष्टव्य,
श्लिष् + तृच् = श्लेष्टृ।

आ + दिश् + तुमुन्
= आ + दिश् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= आ + दिश् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= आ + द् + इ + श् + तुम्
= आ + द् + ए + श् + तुम् (पुगन्तलघूपधस्य च)
= आ + द् + ए + ष् + तुम् (व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः)
= आ + द् + ए + ष् + टुम् (ष्टुना ष्टुः)
= आदेष्टुम् ।

एवम् एव –

आ + दिश् + तव्यत् = आदेष्टव्य, आ + दिश् + तृच् = आदेष्टृ।
प्र + विश् + तुमुन् = प्रवेष्टुम्, प्र + विश् + तव्यत् = प्रवेष्टव्य,
प्र + विश् + तृच् = प्रवेष्टृ ।

छिद् + तुमुन्
= छिद् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= छिद् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= छ् + इ + द् + तुम्
= छ् + ए + द् + तुम् (पुगन्तलघूपधस्य च)
= छ् + ए + त् + तुम् (खरि च)
= छेत्तुम् ।

एवम् एव –

छिद् + तव्यत् = छेत्तव्य, छिद् + तृच् = छेत्तृ ।
खिद्+तुमुन् = खेत्तुम्, खिद्+तव्यत् = खेत्तव्य, खिद्+तृच् = खेत्तृ ।
भिद्+तुमुन् = भेत्तुम्, भिद्+तव्यत् = भेत्तव्य, भिद्+तृच् = भेत्तृ ।

युध् + तुमुन्
= युध् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= युध् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= य् + उ + ध् + तुम्
= य् + ओ + ध् + तुम् (पुगन्तलघूपधस्य च)
= य् + ओ + ध् + धुम् (झषस्तथोर्धोऽधः)
= य् + ओ + द् + धुम् (झलां जश् झशि)
= योद्धुम् । युध्+तव्यत् = योद्धव्य, युध्+तृच् = योद्धृ।

एवम् एव क्रुध्, क्षुध्, बुध्, रुध्, शुध् इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय।

गम् + तुमुन्
= गम् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= गम् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)

= गं + तुम् (नश्चापदान्तस्य झलि)
= गन् + तुम् (अनुस्वारस्य ययि परसवर्णः)
= गन्तुम् । गम्+तव्यत् = गन्तव्य, गम्+तृच् = गन्तृ ।

एवम् एव नम्, नि-यम्, वि-रम्, क्षम् इति एषां धातूनां तुमुन्-तव्यत्-तृच्-प्रत्ययान्तं रूपं दर्शय।

दृश् + तुमुन्
= दृश् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= दृश् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= द् + ऋ + श् + तुम्
= द् + ऋ + अम् + श् + तुम् (सृजिदृशोर्झल्यमकिति, मिदचोऽन्त्यात् परः)[1]

---

[1] सृजिदृशोर्झल्यमकिति ॥ ६. १. ५८ ॥ विधिसूत्रम् ।

सृजिदृशोः + झलि + अम् + अकिति। अर्थः – सृज्, दृश् इति अनयोः धात्वोः अम् आगमः भवति झलादौ अकिति (कित्-भिन्ने) प्रत्यये परे सति। तुमुन् कित् (क् + इत्) प्रत्ययः नास्ति। तुमुन्-प्रत्यये इत्संज्ञकः ककारः नास्ति। अतः तुमुन् अकित् प्रत्ययः। झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, श, ष, स, ह । अकिति झलादौ प्रत्यये परे सति सृज्, दृश् इति अनयोः धात्वोः अम् आगमः भवति। 'मिदचोऽन्त्यात् परः' इति सूत्रेण अम् आगमः धातोः अन्तिमस्वरात् परतः भवति।

मिदचोऽन्त्यात् परः ॥ १. १. ४६ ॥ परिभाषासूत्रम् ।

मित् + अचः + अन्त्यात् परः। अर्थः – अन्त्यात् अचः परः मित् (म्+इत्) आगमः भवति। अचां मध्ये अन्तिमात् अचः परं मित् आगमः भवति। तद्यथा –

= द् + ऋ + अ + श् + तुम् (हलन्त्यम्)
= द् + र् + अ + श् + तुम् (इको यणचि)
= द् + र् + अ + ष् + तुम् (व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः)
= द् + र् + अ + ष् + टुम् (ष्टुना ष्टुः)
= द्रष्टुम् ।

एवम् एव –

दृश् + तव्यत् = द्रष्टव्य, दृश् + तृच् = द्रष्टृ ।
सृज्+तुमुन्=स्रष्टुम्, सृज्+तव्यत्=स्रष्टव्य, सृज्+तृच्=स्रष्टृ ।

लिह् + तुमुन्
= लिह् + तुम् (हलन्त्यम्, उपदेशेऽजनुनासिक इत्)
= लिह् + तुम् (इट्-निषेधः एकाच उपदेशेऽनुदात्तात्)
= ल् + इ + ह् + तुम्
= ल् + ए + ह् + तुम् (पुगन्तलघूपधस्य च)

भिद् + तिप्
= भ् + इ + श्नम् + द् + तिप् (रुधादिभ्यः श्नम्, भिदचोऽन्त्यात् परः)*
= भ् + इ + श्न + द् + ति (हलन्त्यम्)
= भ् + इ + न + द् + ति (लशक्वतद्धिते)
= भ् + इ + न + त् + ति (खरि च)
= भिनत्ति । * *भिदिर्-धातुः रुधादिगणे अन्तर्भूतः।*

रुधादिभ्यः श्नम् ॥ ३. १. ७८ ॥ विधिसूत्रम् ।

अनुवृत्तिः – सार्वधातुके (३. १. ६७), कर्तरि (३. १. ६८), धातोः (३. १. २२), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – रुधादि-धातुभ्यः श्नम् प्रत्ययः भवति कर्तृवाचि-सार्वधातुक-प्रत्यये परे सति। तिप्-प्रत्ययः कर्तृवाची, अत एव कर्तरि इति उच्यते।

= लेढ् + तुम् (हो ढः)[1]
= लेढ् + धुम् (झषस्तथोर्धोऽधः)
= लेढ् + ढुम् (ष्टुना ष्टुः)
= ले + ढुम् (ढो ढे लोपः)[2]
= लेढुम् ।
लिह् + तव्यत् = लेढव्य, लिह् + तृच् = लेढृ ।

एवम् एव –
आ-रुह् + तुम् = आरोढुम्, आ-रुह् + तव्यत् = आरोढव्य,
आ-रुह् + तृच् = आरोढृ ।

ण्वुल्

ण्वुल्तृचौ ॥ ३. १. १३३ ॥ विधिसूत्रम् ।

अनुवृत्तिः – धातोः (३. १. ९१), प्रत्ययः (३. १. १), परश्च (३. १. २) ।
अर्थः – धातोः ण्वुल् तृच् च प्रत्ययौ कर्ता इत्यर्थे भवतः। इमौ प्रत्ययौ धातुमात्रात् भवतः। अस्य पुस्तकस्य ८४तमे पृष्ठे तृच्-प्रत्ययान्तं रूपं दर्शितम्। ण्वुल्-प्रत्ययान्त-शब्दः त्रिषु लिङ्गेषु भवति।

---

[1] **हो ढः** ॥ ८. २. ३१ ॥ विधिसूत्रम् ।
अनुवृत्तिः – झलि (८. २. २६), अन्ते च (८. २. २९), पदस्य (८.१.१६) । अर्थः – हकारस्य ढकारः आदेशः भवति झलि परे सति पदान्ते च। झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, श, ष, स, ह ।

[2] **ढो ढे लोपः** ॥ ८. ३. १३ ॥ विधिसूत्रम् ।
अनुवृत्तिः – संहितायाम् (८. २. १०८)। अर्थः – ढकारे परे सति ढकारस्य लोपः भवति।

(क) *वृद्धिः – इ/ई-स्थाने ऐ, उ/ऊ-स्थाने औ, ऋ/ॠ-स्थाने आर्*

नी + ण्वुल्
= नी + वु (हलन्त्यम्, चुटू)
= नी + अक (युवोरनाकौ)
= न् + ई + अक
= न् + ऐ + अक (अचो ञ्णिति)
= न् + आय् + अक (एचोऽयवायावः)
= नायक ।

एवम् एव –

कृ + ण्वुल् = कारक	परि + चि + ण्वुल् = परिचायक
तॄ + ण्वुल् = तारक	वि + द्रु + ण्वुल् = विद्रावक
धृ + ण्वुल् = धारक	पू + ण्वुल् = पावक
मृ + ण्वुल् = मारक	वृ + ण्वुल् = वारक
सृ + ण्वुल् = सारक	स्मृ + ण्वुल् = स्मारक

(ख) *उपधायाः अकारस्य वृद्धिः*

चल् + ण्वुल्
= चल् + वु (हलन्त्यम्, चुटू)
= चल् + अक (युवोरनाकौ)
= चाल् + अक (अत उपधायाः)
= चालक ।

एवम् एव –

दह् + ण्वुल् = दाहक	नश् + ण्वुल् = नाशक
पच् + ण्वुल् = पाचक	पठ् + ण्वुल् = पाठक
वद् + ण्वुल् = वादक	वह् + ण्वुल् = वाहक

(ग) *लघूपध-धातोः इकः स्थाने गुणः*

(इ-स्थाने ए, उ-स्थाने ओ, ऋ-स्थाने अर्)

छिद् + ण्वुल्

= छिद् + वु (हलन्त्यम्, चुटू)

= छिद् + अक (युवोरनाकौ)

= छ् + इ + द् + अक

= छ् + ए + द् + अक (पुगन्तलघूपधस्य च)

= छेदक । एवम् एव –

भिद् + ण्वुल् = भेदक	रिच् + ण्वुल् = रेचक
लिख् + ण्वुल् = लेखक	सिच् + ण्वुल् = सेचक
द्युत् + ण्वुल् = द्योतक	पुष् + ण्वुल् = पोषक
बुध् + ण्वुल् = बोधक	भुज् + ण्वुल् =भोजक
मुच् + ण्वुल् = मोचक	मुद् + ण्वुल् = मोदक
मुह् + ण्वुल् = मोहक	युज् + ण्वुल् = योजक
रुच् + ण्वुल् = रोचक	रुध् + ण्वुल् = रोधक
शुष् + ण्वुल् = शोषक	कृष् + ण्वुल् = कर्षक
दृश् + ण्वुल् = दर्शक	वृध् + ण्वुल् = वर्धक
वृष् + ण्वुल् = वर्षक	हृष् + ण्वुल् = हर्षक

(घ) *उपधायां दीर्घस्वरे सति इक्स्थाने गुणः न भवति। 'पुगन्त-लघूपधस्य च' इति सूत्रेण लघूपध-धातोः एव गुणः भवति न तु गुरूपध-धातोः । तद्यथा –*

क्रीड् + ण्वुल्

= क्रीड् + वु (हलन्त्यम्, चुटू)

= क्रीड् + अक (युवोरनाकौ)

= क्रीडक । एवम् एव – दीप् + ण्वुल् = दीपक

णेरनिटि ॥ ६. ४. ५१ ॥ विधिसूत्रम् ।

णेः + अनिटि । न इट् यस्य तद् अनिट्, तस्मिन्, अनिटि। अनुवृत्तिः – लोपः (६. ४. ४८), आर्धधातुके (६. ४. ४६), अङ्गस्य (६. ४. १)। अर्थः – इट्-रहितम् आर्धधातुकं परतः अस्ति चेत् णेः (णि इत्यस्य प्रत्ययस्य) लोपः भवति। तद्यथा –

चिन्त् + णिच्[1] + ण्वुल्
= चिन्त् + णि + ण्वु (हलन्त्यम्)
= चिन्त् + इ + वु (चुटू)
= चिन्त् + वु (णेरनिटि)
= चिन्त् + अक (युवोरनाकौ)
= चिन्तक । एवम् एव –

गण् + णिच् + ण्वुल् = गणक पूज् + णिच् + ण्वुल् = पूजक
भक्ष् + णिच् + ण्वुल् = भक्षक शिक्ष् + णिच् + ण्वुल् = शिक्षक

त्व-तलौ

तस्य भावस्त्वतलौ ॥ ५. १. ११९ ॥ विधिसूत्रम् ।

तस्य भावः + त्व-तलौ । अनुवृत्तिः – तद्धिताः (४. १. ७६), ङ्याप्प्रातिपदिकात् (४. १. १), प्रत्ययः (३. १. १), परश्च (३. १. २) । अर्थः – भावार्थे त्व-तल्-प्रत्ययौ प्रातिपदिकेभ्यः भवतः। भावः इत्यस्य

---

[1] दशमगणे पठितेभ्यः चुरादिभ्यः धातुभ्यः स्वार्थे (अर्थविशेषं विनैव) णिच् प्रत्ययः भवति। चिन्त् दशमगणीय-धातुः, अतः णिच् प्रत्ययः।

सर्वेभ्यः धातुभ्यः प्रेरणार्थेऽपि णिच् प्रत्ययः भवति। तद्यथा – पठ् + णिच् = पाठयति, हस् + णिच् = हासयति, दृश् + णिच् = दर्शयति।

अर्थः – असाधारण-धर्मः । तद्यथा – शुभ्रस्य भावः शुभ्रत्वं शुभ्रता वा। साधोः भावः साधुत्वं साधुता वा । त्व-प्रत्ययान्त-शब्दः नपुंसकलिङ्गः, तल्-प्रत्ययान्त-शब्दः स्त्रीलिङ्गः।

शुभ्र + त्व = शुभ्रत्व।

शुभ्र + तल्
= शुभ्र + त (हलन्त्यम्)
= शुभ्र + त + टाप् (अजाद्यतष्टाप्)[1]
= शुभ्र + त + आ (हलन्त्यम्, चुटू)
= शुभ्रता। (अकः सवर्णे दीर्घः)

अधःप्रदत्तानाम् उच्च नीच, उष्ण शीत, नूतन पुरातन इत्यादीनां प्रातिपदिकानां त्व-प्रत्ययान्तं तल्-प्रत्ययान्तं च रूपं दर्शय । तद्यथा, उच्च + त्व = उच्चत्व । उच्च + तल् = उच्चता ।

---

[1] अजाद्यतष्टाप् ॥ ४. १. ४ ॥ विधिसूत्रम् ।

अजाद्यतः + टाप् । अनुवृत्तिः – प्रातिपदिकात् (४. १. १), स्त्रियाम् (४. १. ३), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – अजादिभ्यः प्रातिपदिकेभ्यः अकारान्तेभ्यश्च स्त्रियां टाप् प्रत्ययः भवति।

अजादिगणः – अजा, कोकिला, चटका, अश्वा, मूषिका, बाला, वत्सा, मन्दा, ज्येष्ठा, कनिष्ठा इति एते परिचिताः शब्दाः अजादिगणे वर्तन्ते। अन्येऽपि केचन अपरिचिताः शब्दाः तत्र सन्ति । तद्यथा – एडका, होडा, विलाता ।

कुक्कुट, मृग, सिंह, हंस इत्यादिभ्यः जातिवाचक-शब्देभ्यः 'जातेरस्त्री-विषयादयोपधात् (४. १. ६३) इति सूत्रेण ङीष्प्रत्यये कृते कुक्कुटी, मृगी, सिंही, हंसी इत्यादयः शब्दाः भवन्ति। अजादयः शब्दाः जातिवाचकाः। तेभ्यः ङीष्प्रत्ययं बाधितुम् अजादिशब्दानां पृथक् ग्रहणं कृतम्।

उच्च	नीच	उष्ण	शीत	कठोर	कोमल
चतुर	मूर्ख	दुष्ट	शिष्ट	धीर	अधीर
नूतन	पुरातन	लघु	गुरु	वक्र	ऋजु
वीर	भीरु	सरल	कुटिल	साधु	असाधु
स्थिर	अस्थिर	स्थूल	कृश	स्वच्छ	मलिन

अधोलिखित-प्रातिपदिकानां त्व-प्रत्ययान्तं तल्-प्रत्ययान्तं च रूपं दर्शय। तद्यथा –

देव+त्व = देवत्व। देव+तल् = देवता।

अन्ध	कटु	कवि	कुशल	चपल	दक्ष
नास्तिक	नृप	न्यून	पशु	पात्र	पुरुष
मनुष्य	मित्र	मूक	मूर्ख	शिशु	स्त्री

ष्यञ्

वर्णदृढादिभ्यः ष्यञ् च ॥ ५. १. १२३ ॥ विधिसूत्रम् ।

अनुवृत्तिः – इमनिच् (५. १. १२२), तस्य भावस्त्वतलौ (५. १. ११९), तद्धिताः (४. १. ७६), ङयाप्प्रातिपदिकात् (४. १. १), प्रत्ययः (३. १. १), परश्च (३. १. २)। अर्थः – तस्य भावः इति अस्मिन् अर्थे वर्णविशेषवाचिभ्यः दृढादिभ्यः च प्रातिपदिकेभ्यः इमनिच् प्रत्ययः, त्व-तल्-प्रत्ययौ ष्यञ् प्रत्ययश्च भवन्ति। तद्यथा – मधुरस्य भावः मधुरिमा (मधुर + इमनिच्), मधुरत्व (मधुर + त्व), मधुरता (मधुर + तल्), माधुर्य (मधुर + ष्यञ्)। एते प्रत्ययाः तद्धितसंज्ञकाः। ष्यञ्-प्रत्ययान्त-शब्दः नपुंसकलिङ्गः।

मधुर + ष्यञ् (वर्णदृढादिभ्यः ष्यञ् च)
= मधुर + ष्य (हलन्त्यम्)

= मधुर + य (षः प्रत्ययस्य १. ३. ६)
= माधुर + य (तद्धितेष्वचामादेः)[1]
= माधुर् + य (यस्येति च)[2]
= माधुर्य ।

---

[1] तद्धितेष्वचामादेः ॥ ७. २. ११७ ॥ विधिसूत्रम् ।

अनुवृत्तिः – अचो ञ्णिति (७. २. ११५), वृद्धिः (७. २. ११४), अङ्गस्य (६. ४. १)। अर्थः – ञित् (ञ् + इत्), णित् (ण् + इत्) इति एतौ तद्धितप्रत्ययौ परतः स्तः चेत् अङ्गस्य अचाम् आदेः अचः स्थाने वृद्धिः भवति। ञित्, णित् इति तद्धितप्रत्यये परे सति अङ्गस्य स्वरवर्णेषु प्रथमस्वरस्य स्थाने वृद्धिः भवति।

[2] यस्येति च ॥ ६. ४. १४८ ॥ विधिसूत्रम् ।

यस्य + ईति च । इः च अः च = यम् । इ + अ = य (इको यणचि)। अनुवृत्तिः – लोपः (६. ४. १४७), तद्धिते (६. ४. १४४), भस्य (६. ४. १२९), अङ्गस्य (६. ४. १)। अर्थः – ईकारे तद्धितप्रत्यये च परे सति भसंज्ञकस्य अङ्गस्य अन्त्यः अवर्णः इवर्णः च लोपं गच्छति।

यचि भम् ॥ १. ४. १८ ॥ संज्ञासूत्रम् ।

य् च अच् च यच्, तस्मिन् यचि। अनुवृत्तिः – स्वादिष्वसर्वनामस्थाने (१. ४. १७) । अर्थः – सुप्प्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाः, समासान्त-प्रत्ययाः इति एते स्वादयः। एषाम् अजादिषु यकारादिषु च प्रत्ययेषु परेषु पूर्वस्याः प्रकृतेः भम् इति संज्ञा। (यस्मात् प्रत्ययः विधीयते सा प्रकृतिः।)

अवधेयम् – पुंलिङ्गस्त्रीलिङ्गाभ्यां परेषां सु, औ, जस्, अम्, औट् इति पञ्चानां प्रत्ययानाम्, नपुंसकात् परयोः प्रथमाद्वितीया-बहुवचनयोः च 'सर्वनामस्थानम्' इति संज्ञा। सर्वनामस्थानसंज्ञके प्रत्यय परे सति पूर्वस्य भ-संज्ञा नास्ति।

एवम् एव –

दृढ + ष्यञ् = दार्ढ्य	कृश + ष्यञ् = कार्श्य
शीत + ष्यञ् = शैत्य	उष्ण + ष्यञ् = औष्ण्य
जड + ष्यञ् = जाड्य	पण्डित + ष्यञ् = पाण्डित्य
मूर्ख + ष्यञ् = मौर्ख्य	स्थिर + ष्यञ् = स्थैर्य
शुक्ल + ष्यञ् = शौक्ल्य	लवण + ष्यञ् = लावण्य

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ ५. १. १२४ ॥ विधिसूत्रम् ।

अनुवृत्तिः – ष्यञ् (५. १. १२३), तस्य भावः (५. १. ११९), तद्धिताः (४. १. ७६), ङ्याप्प्रातिपदिकात् (४. १. १), प्रत्ययः (३. १. १), परश्च (३. १. २) । अर्थः – गुणवचनेभ्यः, ब्राह्मणादिभ्यः प्रातिपदिकेभ्यः भावे कर्मणि च ष्यञ् प्रत्ययः भवति। तद्यथा –

गुणवचनेभ्यः – जड + ष्यञ् = जाड्य (जडस्य भावः कर्म वा)

ब्राह्मणादिभ्यः – ब्राह्मण+ष्यञ् = ब्राह्मण्य (ब्राह्मणस्य भावः कर्म वा)

अधिक + ष्यञ् = आधिक्य	अधिपति + ष्यञ् = आधिपत्य
अनुकूल + ष्यञ् = आनुकूल्य	अलस + ष्यञ् = आलस्य
ईश्वर + ष्यञ् = ऐश्वर्य	उचित + ष्यञ् = औचित्य
उदासीन + ष्यञ् = औदासीन्य	कुशल + ष्यञ् = कौशल्य
चतुर + ष्यञ् = चातुर्य	चपल + ष्यञ् = चापल्य
चोर + ष्यञ् = चौर्य	तत्पर + ष्यञ् = तात्पर्य
तरतम + ष्यञ् = तारतम्य	तरुण + ष्यञ् = तारुण्य
दीन + ष्यञ् = दैन्य	दीर्घ + ष्यञ् = दैर्घ्य
धीर + ष्यञ् = धैर्य	निपुण + ष्यञ् = नैपुण्य
पिशाच + ष्यञ् = पैशाच्य	पिशुन + ष्यञ् = पैशुन्य

पूर्वापर + ष्यञ् = पौर्वापर्य
बहुल + ष्यञ् = बाहुल्य
मङ्गल + ष्यञ् = माङ्गल्य
मध्यस्थ + ष्यञ् = माध्यस्थ्य
मन्द + ष्यञ् = मान्द्य
मानुष + ष्यञ् = मानुष्य
मलिन + ष्यञ् = मालिन्य
यथातथ + ष्यञ् = याथातथ्य
यथार्थ + ष्यञ् = याथार्थ्य
युवराज + ष्यञ् = यौवराज्य
विचित्र + ष्यञ् = वैचित्र्य
विदग्ध + ष्यञ् = वैदग्ध्य
विपरीत + ष्यञ् = वैपरीत्य
विफल + ष्यञ् = वैफल्य
विराग + ष्यञ् = वैराग्य
विशाल + ष्यञ् = वैशाल्य
विशिष्ट + ष्यञ् = वैशिष्ट्य
विषम + ष्यञ् = वैषम्य
शिथिल + ष्यञ् = शैथिल्य
शूर + ष्यञ् = शौर्य
सकल + ष्यञ् = साकल्य
सफल + ष्यञ् = साफल्य
समर्थ + ष्यञ् = सामर्थ्य
सरल + ष्यञ् = सारल्य
सुख + ष्यञ् = सौख्य
सुन्दर + ष्यञ् = सौन्दर्य
स्थूल + ष्यञ् = स्थौल्य
स्वस्थ + ष्यञ् = स्वास्थ्य

ठञ्

कालाट्ठञ् ॥ ४. ३. ११ ॥ विधिसूत्रम् ।

कालात् + ठञ् । अनुवृत्तिः – शेषे (४. २. ९२), तद्धिताः (४. १. ७६), ङयाप्प्रातिपदिकात् (४. १. १), प्रत्ययः (३. १. १), परश्च (३. १. २) । अर्थः – कालवाचिनः प्रातिपदिकात् सुबन्तात् तत्र भवः इत्यादिषु अर्थेषु ठञ् प्रत्ययः भवति । ठञ्-प्रत्ययान्त-शब्दः विशेषणम् । तस्य लिङ्गं वचनं च विशेष्यानुसारेण परिवर्तते ।

काल + ठञ्
= काल + ठ (हलन्त्यम्)

= काल + इक (ठस्येकः)[1]
= काल् + इक (यचि भम्, यस्येति च)
= कालिक ।

कालिकः (काले भवः जातः वा)। कालिकी (काले भवा जाता वा)। कालिकम् (काले भवं जातं वा)।

दिन + ठञ् (कालाट्ठञ्)
= दिन + ठ (हलन्त्यम्)
= दिन + इक (ठस्येकः)
= द् + इ + न + इक
= द् + ऐ + न + इक (तद्धितेष्वचामादेः)
= दैन + इक
= दैन् + इक (यस्येति च)
= दैनिक ।

एवम् एव –

अधुना + ठञ् = आधुनिक	इह + ठञ् = ऐहिक
पक्ष + ठञ् = पाक्षिक	वर्ष + ठञ् = वार्षिक
संवत्सर + ठञ् = सांवत्सरिक	समय + ठञ् = सामयिक
पूर्वाह्ण + ठञ् = पौर्वाह्णिक	सप्ताह + ठञ् = साप्ताहिक
अपराह्ण + ठञ् = आपराह्णिक	त्रिमास + ठञ् = त्रैमासिक
षण्मास + ठञ् = षाण्मासिक	हेमन्त + ठञ् = हैमन्तिक
वसन्त + ठञ् = वासन्तिक	शीत + ठञ् = शैतिक

---

[1] ठस्येकः ॥ ७. ३. ५० ॥ विधिसूत्रम् ।

ठस्य + इकः । अनुवृत्तिः – अङ्गस्य (६. ४. १)। अर्थः – अङ्गात् परस्य प्रत्यय-ठकारस्य इकः आदेशः भवति ।

परिशिष्टम्

क्तिन्

गम् + क्तिन्
= गम् + ति (हलन्त्यम्, लशक्वतद्धिते)
= ग + ति (अनुदात्तोपदेशवनतितनो०)[1]
= गति ।

एवम् एव –

प्र + गम् + क्तिन् = प्रगति	दुर् + गम् + क्तिन् = दुर्गति
नम् + क्तिन् = नति	प्र + नम् + क्तिन् = प्रणति
अव + नम् + क्तिन् = अवनति	रम् + क्तिन् = रति
वि + रम् + क्तिन् = विरति	यम् + क्तिन् = यति
नि + यम् + क्तिन् = नियति	मन् + क्तिन् = मति

---

[1] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।।
६. ४. ३७ ।। विधिसूत्रम् ।

अनुवृत्तिः – अङ्गस्य (६. ४. १) । अर्थः – यदि झलादिः कित् (क् + इत्) ङित् (ङ् + इत्) च प्रत्ययः परतः अस्ति तर्हि अनुदात्तोपदेशानाम् अनुनासिकान्तानां वन्, तन् इत्यादीनां धातूनाम् अङ्गस्य अनुनासिक-लोपः भवति।

झल् – वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः, श, ष, स, ह । अनुदात्तोपदेशः – पाणिनिना यः धातुः अनुदात्तः पठितः सः अनुदात्तोपदेशः। तद्यथा – यम्, रम्, नम्, गम्, हन्, मन् । एतेषां धातूनाम्, वन्, तन्, क्षण्, क्षिण् इति एषा धातूनां च अन्तिमः अनुनासिकः (म् न् ण्) लोपं गच्छति यदि झलादिः कित् ङित् च प्रत्ययः परतः स्यात्।

सम् + मन् + क्तिन् = सम्मति अनु + मन् + क्तिन् = अनुमति
वि + मन् + क्तिन् = विमति तन् + क्तिन् = तति

सम् + तन् + क्तिन्
= सम् + तन् + ति (हलन्त्यम्, लशक्वतद्धिते)
= सम् + त + ति (अनुदात्तोपदेशवनतितनोत्यादीनाम्०)
= सं + त + ति (मोऽनुस्वारः)
= संतति *अथवा* सन्तति (वा पदान्तस्य)

कम् + क्तिन्
= काम् + क्तिन् (अनुनासिकस्य क्विझलोः क्ङिति)[1]
= काम् + ति (हलन्त्यम्, लशक्वतद्धिते)
= कां + ति (नश्चापदान्तस्य झलि)
= कान् + ति (अनुस्वारस्य ययि परसवर्णः)
= कान्ति ।

एवम् एव –
क्लम् + क्तिन् = क्लान्ति क्षम् + क्तिन् = क्षान्ति
भ्रम् + क्तिन् = भ्रान्ति वम् + क्तिन् = वान्ति
शम् + क्तिन् = शान्ति वि + श्रम् + क्तिन् = विश्रान्ति

बुध् + क्तिन्
= बुध् + ति (हलन्त्यम्, लशक्वतद्धिते)

---

[1] अनुनासिकस्य क्विझलोः क्ङिति ॥ ६. ४. १५ ॥ विधिसूत्रम् ।

अनुवृत्तिः – उपधायाः (६. ४. ७), अङ्गस्य (६. ४. १), दीर्घः (६. ३. १११)। अर्थः – अनुनासिकान्तस्य अङ्गस्य उपधायाः दीर्घः भवति यदि क्वि-प्रत्ययः, झलादिः कित् ङित् च प्रत्ययः परतः स्यात् ।

= बुध् + धि (झषस्तथोर्धोऽधः)
= बुद् + धि (झलां जश् झशि)
= बुद्धि ।

एवम् एव –

ऋध् + क्तिन् = ऋद्धि वृध् + क्तिन् = वृद्धि
शुध् + क्तिन् = शुद्धि सिध् + क्तिन् = सिद्धि

दृश् + क्तिन्
= दृश् + ति (हलन्त्यम्, लशक्वतद्धिते)
= दृष् + ति (व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः)
= दृष् + टि (ष्टुना ष्टुः)
= दृष्टि । एवम् एव –

वि + नश् + क्तिन् = विनष्टि

तुष् + क्तिन्
= तुष् + ति (हलन्त्यम्, लशक्वतद्धिते)
= तुष् + टि (ष्टुना ष्टुः)
= तुष्टि ।

एवम् एव –

पुष् + क्तिन् = पुष्टि वृष् + क्तिन् = वृष्टि

सृज् + क्तिन्
= सृज् + ति (हलन्त्यम्, लशक्वतद्धिते)
= सृष् + ति (व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः)
= सृष् + टि (ष्टुना ष्टुः)
= सृष्टि ।

भिद् + क्तिन्
= भिद् + ति (हलन्त्यम्, लशक्वतद्धिते)
= भित् + ति (खरि च)
= भित्ति ।

एवम् एव –

सम् + पद् + क्तिन् = सम्पत्ति।
वि + पद् + क्तिन् = विपत्ति।
आ + पद् + क्तिन् = आपत्ति।

मुच् + क्तिन्
= मुच् + ति (हलन्त्यम्, लशक्वतद्धिते)
= मुक् + ति (चोः कुः)
= मुक्ति ।

भज् + क्तिन्
= भज् + ति (हलन्त्यम्, लशक्वतद्धिते)
= भग् + ति (चोः कुः, यथासङ्ख्यमनुदेशः समानाम्)
= भक् + ति (खरि च)
= भक्ति ।

एवम् एव –

वि + भज् + क्तिन् = विभक्ति ।
युज् + क्तिन् = युक्ति ।
नि + युज् + क्तिन् = नियुक्ति ।

घञ्

पच् + घञ्
= पच् + अ (हलन्त्यम्, लशक्वतद्धिते)
= पाच् + अ (अत उपधायाः)
= पाक् + अ (चजोः कु घिण्ण्यतोः)[1]
= पाक ।

भज् + घञ्
= भज् + अ (हलन्त्यम्, लशक्वतद्धिते)
= भाज् + अ (अत उपधायाः)
= भाग् + अ (चजोः कु घिण्ण्यतोः)
= भाग ।

एवम् एव –
त्यज् + घञ् = त्याग । यज् + घञ् = याग ।

क्त

शुष् + क्त
= शुष् + त (लशक्वतद्धिते)
= शुष् + क (शुषः कः ८. २. ५१)
= शुष्क।

---

[1] चजोः कु घिण्ण्यतोः ॥ ७. ३. ५२ ॥ विधिसूत्रम् ।

च-जोः कु घित् + ण्यतोः । अर्थः – यदि घित् (घ्+इत्) ण्यत् वा प्रत्ययः परतः अस्ति तर्हि चकार-जकारयोः स्थाने कवर्गादेशः भवति। घञ् घित् प्रत्ययः । अतः अनेन सूत्रेण चकार-स्थाने ककारः आदेशः जातः।

पच् + क्त
= पच् + त (लशक्वतद्धिते)
= पच् + व (पचो वः ८. २. ५२)
= पक् + व (चोः कुः)
= पक्व।

हल्-सन्धिः

रामान् + च
= रामारु + च (नश्छव्यप्रशान्)[1]
= रामांरु + च (अनुनासिकात् परोऽनुस्वारः)[2]
= रामांर् + च (उपदेशेऽजनुनासिक इत्)
= रामांः + च (खरवसानयोर्विसर्जनीयः)
= रामांस् + च (विसर्जनीयस्य सः)
= रामांश् + च (स्तोः श्चुना श्चुः)
= रामांश्च ।

---

[1] नश्छव्यप्रशान् ॥ ८. ३. ७ ॥ विधिसूत्रम् ।

नः + छवि + अप्रशान् । अनुवृत्तिः – अम्-परे ८. ३. ६), रु (८. ३. १), पदस्य (८. १. १६), संहितायाम् (८. २. १०८)। छव् – च, छ, ट, ठ, त, थ । अम् – सर्वे स्वराः, अन्तःस्थाः, ह, ञ, म, ङ, ण, न । अम् परः यस्मात् सः अम्-परः । अर्थः – यदि अम्-परः छव्प्रत्याहारान्तर्गतः वर्णः परतः अस्ति तर्हि नकारान्त-पदस्य रु भवति प्रशान्-शब्दं वर्जयित्वा।

[2] अनुनासिकात् परोऽनुस्वारः ॥ ८. ३. ४ ॥ विधिसूत्रम् ।

अनुनासिकात् परः + अनुस्वारः । अनुवृत्तिः – पूर्वस्य (८. ३. २), रु (८. ३. १), संहितायाम् (८. २. १०८) । अर्थः – रु इत्यस्मात् पूर्वो यः वर्णः तस्मात् परः अनुस्वारः आगमः भवति।

तान् + तान्
= तारु + तान् (नश्छव्यप्रशान्)
= तांरु + तान् (अनुनासिकात् परोऽनुस्वारः)
= तांर् + तान् (उपदेशेऽजनुनासिक इत्)
= तांः + तान् (खरवसानयोर्विसर्जनीयः)[1]
= तांस् + तान् (विसर्जनीयस्य सः)
= तांस्तान् ।

धातुरूपम्

पा + तिप् (तिप्तस्झि० ३. ४. ७८)
= पा + ति (हलन्त्यम्)
= पा + शप् + ति (कर्तरि शप् ३. १. ६८)
= पा + अ + ति (हलन्त्यम्, लशक्वतद्धिते)
= पिब + अ + ति (पा-घ्रा-ध्मा-स्था० ७. ३. ७८)[2]
= पिबति । (अतो गुणे ६. १. ९७)

शप् विकरणः कथ्यते। अयं धातोः परं तिङ्-प्रत्ययात् पूर्वं च योज्यते । यतो हि शप्-प्रत्ययस्य श् इत्संज्ञकः, अतः अयं शित् (श् + इत्) प्रत्ययः कथ्यते। शप्-प्रत्ययस्य प् अपि इत्संज्ञकः, अतोऽयं पित् (प् + इत्) प्रत्ययोऽपि कथ्यते।

---

[1] विरामोऽवसानम् ॥ १. ४. ११० ॥ संज्ञासूत्रम् ।
विरामः + अवसानम् । अर्थः – विरामः अवसानसंज्ञकः भवति। विरामः (यस्मात् परं वर्णः न उच्चार्यते, अस्यार्थः, अन्तिमवर्णः) अवसानं कथ्यते।

[2] पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदां
पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदाः ॥ विधिसूत्रम्॥

उत्तराणि

पृष्ठम् २४, क्तिन् प्रत्ययः

वि+कृ, वि+च्यु, प्र+आप्, नि+वृत्, प्रति+श्रु ।

पृष्ठम् २५, घञ् प्रत्ययः

आ+क्षिप्, वि+क्षिप्, दिश्, आ+दिश्, उप+दिश्, निर्+दिश्, प्र+दिश्, वि+दिश्, वि+द्विष्, दिह्, वि+भिद्, नि+मिष्, लिख्, प्र+विश्, परि+विश्, अभि+नि+विश्, अव+शिष्, वि+शिष् ।

पृष्ठम् २७, घञ् प्रत्ययः

वि+क्षुभ्, वि+द्रुह्, प्र+मुद्, अनु+रुध्, वि+रुध्, प्रति+शुध् ।

पृष्ठम् २९, घञ् प्रत्ययः

नि+अस्, उप+नि+अस्, वि+नि+अस्, सम्+अस्, आ+काश्, प्र+काश्, आ+यस्, आ+चर्, प्र+चर्, वि+चर्, सम्+आ+चर्, सम्+चर्, तन्, तप्, अनु+तप्, सम्+तप्, त्रस्, नि+नद्, वि+नश्, प्र+नम्, उत्+पत्, प्र+पत्, प्र+मद्, मन्, अप+मन्, अभि+मन्, प्र+यस्, वि+रम्, आ+लप्, प्र+लप्, वि+लप्, वि+लस्, वद्, अनु+वद्, प्रति+वद्, वि+वद्, उप+वस्, नि+वस्, प्र+वस्, प्र+वह्, अभि+शप्, वि+श्वस्, उत्+सह्, उप+हस्, परि+हस् ।

पृष्ठम् ३१, घञ् प्रत्ययः

आ+कृ, उप+कृ, प्र+कृ, वि+कृ, आ+धृ, भृ, परि+वृ, सृ, अनु+सृ, प्र+सृ, ह्, आ+ह्, उप+ह्, प्र+ह्, वि+ह्, सम्+आ+ह् ।

पृष्ठम् ३७, अनीयर् प्रत्ययः

छिद्, भिद्, पिष्, लिप्, श्लिष्, सिच् ।

भुज्, युज्, रुध्, लुभ्, शुच्, शुभ् ।

पृष्ठम् ३८, अनीयर् प्रत्ययः

अनु+सृ, आ+कृष्, वृ, स्मृ ।

पृष्ठम् ४२, अच् प्रत्ययः

उद्+इ, वि+इ, सम्+इ, सम्+अनु+इ, सम्+अव+इ, सम्+चि, वि+जि, अभि+नी, प्र+नी, नि+ली, प्र+ली, अति+शी, आ+शी, प्र+श्रि ।

पृष्ठम् ४३, अप् प्रत्ययः

अव+कृ, आ+कृ, नि+कृ, आ+दृ, वृ, शृ ।

वि+प्लु, अनु+भू, परा+भू, सम्+भू, प्र+सू ।

पृष्ठम् ४५, अप् प्रत्ययः

कर्ण्, जप्, नि+यम्, नि+स्वन्, पण्, यम्, रण्, वश्, सम्+गम्, सम्+यम्।

पृष्ठम् ४६, ल्युट् प्रत्ययः

आ+क्रम्, आ+ख्या, ज्ञा, दा, पा, या, वि+आ+ख्या, स्था, स्ना।

पृष्ठम् ४७, ल्युट् प्रत्ययः

क्षिप्, छिद्, भिद्, पिष्, लिख्, लिप्, श्लिष्, सिच् ।

पृष्ठम् ४९, ल्युट् प्रत्ययः

अनु+कृ, अनु+सृ, आ+कृष्, कृत्, घृष्, जागृ, तृप्, धृ, मृ, सृज्, स्मृ, ह्।

सूत्रसूची

अकः सवर्णे दीर्घः	४९	एङः पदान्तादति	५६
अचो ञ्णिति	३०	एचोऽयवायावः	५३
अजाद्यतष्टाप्	९७	एरच्	४१
अट्कुप्वाङनुम्व्यवाये०	७४	कालाट्ठञ्	१०१
अत उपधायाः	२८	क्त-क्तवतू निष्ठा	७६
अतो रोरप्लुतादप्लुते	७०	खरवसानयोर्विसर्जनीयः	६९
अदर्शनं लोपः	२२	खरि च	५८
अदेङ् गुणः	१७	गुणवचनब्राह्मणादिभ्यः०	१००
अनुदात्तोपदेशवनति०	१०३	ग्रहवृदृनिश्चिगमश्च	४४
अनुनासिकस्य क्वि०	१०४	ङमो ह्रस्वादचि ङमुण्०	६४
अनुनासिकात् परो०	१०८	चजोः कु घिण्ण्यतोः	१०७
अनुस्वारस्य ययि०	६६	चुटू	२१
अलोऽन्त्यात् पूर्व०	३१	चोः कुः	५७
आद् गुणः	१९, ५०	छे च	६६
आदिर्ञिटुडवः	२०	झयो होऽन्यतरस्याम्	६२
आद्यन्तौ टकितौ	७७	झरो झरि सवर्णे	६२
आदेच उपदेशेऽशिति	४६	झलां जशोऽन्ते	५७
आर्धधातुकं शेषः	४०	झलां जश् झशि	५८
आर्धधातुकस्येड्०	७७	झषस्तथोर्धोऽधः	८१
आने मुक्	४०	ठस्येकः	१०२
इको यणचि	५२	ढो ढे लोपः	९३
ईदूदेद् द्विवचनं०	५६	णेरनिटि	९६
उदः स्थास्तम्भोः०	६२	ण्वुल्तृचौ	९३
उरण् रपरः	१७	तद्धितेष्वचामादेः	९९
ऋदोरप्	४२	तपरस्तत्कालस्य	१३
एकाच उपदेशे०	७९	तस्य भावस्त्वतलौ	९६

तस्य लोपः	२०	वर्णदृढादिभ्यः ष्यञ् च	९८
तिङ शित् सार्व०	३८	वा पदान्तस्य	६५
तोर्लि	६२	वावसाने	५८
तोः षि	६१	वा शरि	६८
न पदान्ताट्टोरनाम्	६१	विरामोऽवसानम्	१०९
नश्चापदान्तस्य०	६६	विसर्जनीयस्य सः	६७
नश्छव्यप्रशान्	१०८	वृद्धिरादैच्	१६
पदान्ताद् वा	६७	वृद्धिरेचि	५१
पदान्तस्य	७६	व्रश्चभ्रस्जसृजमृजयज०	८२
परः सन्निकर्षः संहिता	१९	शश्छोऽटि	६०
पुगन्तलघूपधस्य च	२४	शात्	६०
भोभगोअघो०	७१	ष्टुना ष्टुः	६०
मिदचोऽन्त्यात् परः	९१	समानकर्तृकयोः०	७६
मोऽनुस्वारः	६५	समासेऽनञ्पूर्वे क्त्वो०	३४
यचि भम्	९९	स-सजुषो रुः	६९
यरोऽनुनासिके०	६३	सार्वधातुकार्धधातुकयोः	३८
यस्मात् प्रत्ययविधि०	३१	सृजिदृशोर्झल्यमकिति	९१
यस्येति च	९९	स्तोः श्चुना श्चुः	५९
युवोरनाकौ	४५	स्त्रियां क्तिन्	२२
रदाभ्यां निष्ठातो नः०	८१	स्वौजसमौट्छष्टाभ्याम्०	६९
रषाभ्यां नो णः०	७३	हलन्त्यम्	२०
रुधादिभ्यः श्नम्	९२	हशि च	७१
लशक्वतद्धिते	२१	हो ढः	९३
लोपः शाकल्यस्य	५४	ह्रस्वस्य पिति कृति तुक्	३३

ISBN 81-7058-539-2
Rs. 50.00